ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः

हरिः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

# सप्तमं काण्डं

**Note: Please refer to the book,TS Kandam 1 for notes and conventions used in this Compilation.**

**Version 0.0** **January 31, 2019**

# Contents


7 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां सप्तमं काण्डं 3

7.1 सप्तमकाण्डे प्रथमः प्रश्नः– अश्वमेधगतमन्त्राणामभिधानं....3

7.1.1 Appendix ........................................................ 29

7.2 सप्तमकाण्डे द्वितीयः प्रश्नः – षड् रात्राद्यानां निरूप्णं..... 30

7.3 सप्तमकाण्डे तृतीयः प्रश्नः – सत्रजातनिरूप्णं................ 54

7.4 सप्तमकाण्डे चतुर्थः प्रश्नः – सत्रकर्मनिरूप्णं........................ 76

7.4.1 Appendix ........................................................ 103

7.5 सप्तमकाण्डे पञ्चमः प्रश्नः – सत्रविशेषाभिधानं..............104

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, हरिः ओं

# 7 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां सप्तमं काण्डं

## 7.1 सप्तमकाण्डे प्रथमः प्रश्नः– अश्वमेधगतमन्त्राणामभिधानं

**7.1.1.1**

प्रजननं ज्योतिरग्नि–र्देवतानां ज्योतिर्विराट् छन्दसां ज्योतिर्विराड्
वाचोऽग्नौ सं तिष्ठते विराजमभि संपद्यते तस्मात् तज्ज्योतिरुच्यते द्वौ
स्तोमौ प्रातः सवनं ँवहतो यथा प्राणश्चाऽपानश्च द्वौ माद्ध्यंदिन७ं
सवनं ँयथा चक्षुश्च श्रोत्रं च द्वौ तृतीयसवनं ँयथा वाक् च प्रतिष्ठा
च पुरुषसंमितो वा एष यज्ञोऽस्थूरि – [ ] 1

**7.1.1.2**

यँ कामं कामयते तमेतेनाभ्यश्नुते सर्व७ं ह्यस्थुरिणाऽभ्यश्नुते
ऽग्निष्टोमेन वै प्रजापतिः प्रजा असृजत ता अग्निष्टोमेनैव
पर्यगृह्णात् तासां परिगृहीताना–मश्वतरोऽत्यप्रवत तस्यानुहाय
रेत आऽदत्त तद्–गर्दभे न्यमार्ट् तस्माद्–गर्दभो द्विरेता अथो

आहुर्वडबायां न्यमार्डिति तस्माद्-वडबा द्विरेता अथो

आहुरोषधीषु - [ ] 2

7.1.1.3

न्यमार्डिति तस्मादोषधयो ऽनभ्यक्ता रेभन्त्यथो आहुः प्रजासु न्यमार्डिति

तस्माद्-यमौ जायेते तस्मादश्वतरो न प्र जायत आत्तरेता हि तस्माद्

बर्.हिष्यनवक्लृप्तः सर्ववेदसे वा सहस्रे वाऽव क्लृप्तोऽति ह्यप्रवत य

एवं ँविद्वानग्निष्टोमेन यजते प्राजाताः प्रजा जनयति परि प्रजाता

गृह्णाति तस्मादाहुर्ज्येष्ठयज्ञ इति - [ ] 3

7.1.1.4

प्रजापतिर्वाव ज्येष्ठः स ह्येतेनाग्रेऽयजत प्रजापतिरकामयत प्र

जायेयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवता ऽन्वसृज्यत

गायत्री छन्दो रथन्तर९ साम ब्राह्मणो मनुष्याणामजः पशूनां तस्मात्

ते मुख्या मुखतो ह्यसृज्यन्तोरसो बाहुभ्यां पञ्चदशं निरमिमीत

तमिन्द्रो देवताऽन्वसृज्यत त्रिष्टुप् छन्दो बृहथ् - [ ] 4

**7.1.1.5**

साम राजन्यो मनुष्याणामविः पशूनां तस्मात् ते वीर्यावन्तो
वीर्याद्ध्यसृज्यन्त मध्यतः सप्तदशं निरमिमीत तं ँविश्वे देवा देवता
अन्वसृज्यन्त जगती छन्दो वै रूपꣳ साम वैश्यो मनुष्याणां गावः
पशूनां तस्मात् त आद्या अन्नधानाद्ध्य सृज्यन्त तस्माद्-भूयाꣳ -
सोऽन्येभ्यो भूयिष्ठा हि देवता अन्वसृज्यन्त पत्त एकविꣳ शं
निरमिमीत तमनुष्टुप् छन्दो - [ ] 5

**7.1.1.6**

ऽन्वसृज्यत वैराजꣳ साम शूद्रो मनुष्याणामश्वः पशूनां तस्मात् तौ
भूतसं क्रामिणावश्वश्च शूद्रश्च तस्माच्छूद्रो यज्ञेऽनवक्लृप्तो न हि
देवता अन्वसृज्यत तस्मात् पादावुप जीवतः पत्तो ह्यसृज्येतां प्राणा
वै त्रिवृदर्धमासाः पञ्चदशः प्रजापतिः सप्तदशस्त्रय इमे लोका
असावादित्य एकविꣳश एतस्मिन् वा एते श्रिता एतस्मिन् प्रतिष्ठिता
( ) य एवं ँवेदैतस्मिन्नेव श्रयत एतस्मिन् प्रति तिष्ठति । 6

*(अस्थूरि - रोषधीषु - ज्येष्ठयज्ञ इति - बृह - दनुष्टुप् छन्दः - प्रतिष्ठिता - नव च) (A1)*

**7.1.2.1**

प्रातः सवने वै गायत्रेण छन्दसा त्रिवृते स्तोमाय ज्योतिर्दधदेति त्रिवृता ब्रह्मवर्चसेन पञ्चदशाय ज्योतिर्दधदेति पञ्चदशेनौजसा वीर्येण सप्तदशाय ज्योतिर्दधदेति सप्तदशेन प्राजापत्येन प्रजननेनैकवि॒ꣳशाय ज्योतिर्दधदेति स्तोम एव तथ् स्तोमाय ज्योतिर्दधदेत्यथो स्तोम एव स्तोममभि प्र णयति यावन्तो वै स्तोमास्तावन्तः कामास्तावन्तो लोका ( ) -स्तावन्ति ज्योतीꣳष्येतावत एव स्तोमानेतावतः कामानेतावतो लोकानेतावन्ति ज्योतीꣳष्यव रुन्धे । 7

*(तावन्तो लोका - स्त्रयोदश च) (A2)*

**7.1.3.1**

ब्रह्मवादिनो वदन्ति स त्वै यजेत योऽग्निष्टोमेन यजमानोऽथ सर्वस्तोमेन यजेतेति यस्य त्रिवृतमन्तर्यन्ति प्राणाꣳ-स्तस्यान्तर्यन्ति

प्राणेषु मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्य
पञ्चदशमन्तर्यन्ति वीर्यं तस्यान्तर्यन्ति वीर्ये मेऽप्यसदिति खलु वै
यज्ञेन यजमानो यजते यस्य सप्तदश-मन्तर्यन्ति - [ ] **8**

**7.1.3.2**

प्रजां तस्यान्तर्यन्ति प्रजायां मेऽप्यसदिति खलु वै यज्ञेन यजमानो
यजते यस्यैकवि॒ꣳशमन्तर्यन्ति प्रतिष्ठां तस्यान्तर्यन्ति प्रतिष्ठायां
मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्य
त्रिणवमन्तर्यन्त्यृतूꣳश्च तस्य नक्षत्रियां च विराजमन्तर्यन्त्यृतुषु
मेऽप्यसन्नक्षत्रियायां च विराजीति - [ ] **9**

**7.1.3.3**

खलु वै यज्ञेन यजमानो यजते यस्य त्रयस्त्रि॒ꣳशमन्तर्यन्ति
देवतास्तस्यान्तर्यन्ति देवतासु मेऽप्यसदिति खलु वै यज्ञेन यजमानो
यजते यो वै स्तोमानामवमं परमतां गच्छन्तं वेद परमतामेव गच्छति
त्रिवृद्वै स्तोमानामवमस्त्रिवृत् परमो य एवं वेद परमतामेव गच्छति । **10**

*(सप्तदशमन्तर्यन्ति - विराजीति - चतुश्चत्वारि॒ꣳशच्च) (A3)*

7.1.4.1

अङ्गिरसो वै सत्रमासत ते सुवर्गं ँलोकमायन् तेषा॑ं हविष्मा॑श्च हविष्कृच्चाऽहीयेतां तावकामयेता॑ं सुवर्गं ँलोकमियावेति तावेतं द्विरात्रमपश्यतां तमाऽहरतां तेनायजेतां ततो वै तौ सुवर्गं ँलोकमैतां ँय एवं ँविद्वान् द्विरात्रेण यजते सुवर्गमेव लोकमेति तावैतां पूर्वेणाह्ना ऽगच्छतामुत्तरेणा - [ ] 11

7.1.4.2

-भिप्लवः पूर्वमहर्भवति गतिरुत्तरं ज्योतिष्टोमोऽग्निष्टोमः पूर्वमहर्भवति तेजस्तेनाव रुन्धे सर्वस्तोमोऽतिरात्र उत्तर॑ं सर्वस्याऽऽ*प्त्यै सर्वस्याऽवरुद्ध्यै गायत्रं पूर्वेऽहन्थ्साम भवति तेजो वै गायत्री गायत्री ब्रह्मवर्चसं तेज एव ब्रह्मवर्चसमात्मन् धत्ते त्रैष्टुभमुत्तर ओजो वै वीर्यं त्रिष्टुगोज एव वीर्यमात्मन् धत्ते रथंतरं पूर्वे - [ ] 12

7.1.4.3

ऽहन्थ् साम भवतीयं ँवै रथन्तरमस्यामेव प्रति तिष्ठति बृहदुत्तरेऽसौ वै बृहदमुष्यामेव प्रति तिष्ठति तदाहुः क्व जगती चाऽनुष्टुप् चेति वैखानसं पूर्वेऽहन्थ् साम भवति तेन जगत्यै नैति षोडश्युत्तरे

तेनानुष्टुभोऽथा ऽऽ*हुर्यथ् समानेऽर्धमासे स्याता-मन्यतरस्याह्नो

वीर्यमनु ( ) पद्येतेत्य-मावास्यायां पूर्वमह-र्भवत्युत्तरस्मि-न्नुत्तरं

नानैवा ऽर्धमासयोर्भवतो नानावीर्ये भवतो हविष्मन्निधनं पूर्वमहर्भवति

हविष्कृन्निधन-मुत्तरं प्रतिष्ठित्यै । **13**

*(उत्तरेण - रथन्तरं पूर्वे - ऽन्वे - कविꣳशतिश्च) (A4)*

**7.1.5.1**

आपो वा इदमग्रे सलिलमासीत् तस्मिन् प्रजापति-र्वायुर्भूत्वा ऽचरथ्

स इमामपश्यत् तां ँवराहो भूत्वाऽहरत् तां ँविश्वकर्मा भूत्वा व्यमाट्र्थ्

साऽप्रथत सा पृथिव्यभवत् तत् पृथिव्यै पृथिवित्वं तस्यामश्राम्यत्

प्रजापतिः स देवानसृजत वसून् रुद्रानादित्यान् ते देवाः

प्रजापतिमब्रुवन् प्रजायामहा इति सोऽब्रवीद् - [ ] **14**

**7.1.5.2**

-यथाऽहं ँयुष्माꣳस्तपसा ऽसृक्ष्येवं तपसि प्रजनन-मिच्छध्वमिति

तेभ्योऽग्निमायतनं प्राऽयच्छदेतेनाऽऽ*यतनेन श्राम्यतेति

तेऽग्निनाऽऽ*यतनेनाऽ-श्राम्यन् ते सँवथ्सर एकां गामसृजन्त तां

ँवसुभ्यो रुद्रेभ्य आदित्येभ्यः प्राऽयच्छन्नेता॒ रक्षद्ध्वमिति तां

ँवसवो रुद्रा आदित्या अरक्षन्त सा वसुभ्यो रुद्रेभ्य आदित्येभ्यः

प्राजायत त्रीणि च - [ ] 15

**7.1.5.3**

शतानि त्रयस्त्रि॒शतं चाथ सैव सहस्रतम्यभवत् ते देवाः

प्रजापतिमब्रुवन्थ् सहस्रेण नो याजयेति सोऽग्निष्टोमेन वसूनयाजयत्

त इमं ँलोकमजयन् तच्चाददुः स उक्थ्येन रुद्रानयाजयत्

तेऽन्तरिक्षमजयन् तच्चाददुः सोऽतिरात्रेणाऽऽ*दित्यानयाजयत् तेऽमुं

ँलोकमजयन् तच्चाददु -स्तदन्तरिक्षं - [ ] 16

**7.1.5.4**

ँव्यवैर्यत तस्माद्-रुद्रा घातुका अनायतना हि तस्मादाहुः शिथिलं ँवै

मध्यम-महस्त्रिरात्रस्य वि हि तदवैर्यतेति त्रैष्टुभं मध्यमस्याह्न

आज्यं भवति सँयानानि सूक्तानि श॒सति षोडशिन॒ श॒सत्यह्नो

धृत्या अशिथिलंभावाय तस्मात् त्रिरात्रस्याग्निष्टोम एव प्रथममहः

स्यादथोक्थ्यो ऽथाऽतिरात्र एषां ँलोकानां ँविधृत्यै त्रीणित्रीणि

शता–न्यनूचीनाह–मव्यवच्छिन्नानि ददा – [ ] 17

**7.1.5.5**

–त्येषां ँलोकानामनु सन्तत्यै दशतं न विच्छिन्द्याद्–विराजं

नेद्विच्छिनदानीत्यथ या सहस्रतम्यासीत् तस्यामिन्द्रश्च विष्णुश्च

व्यायच्छेता॒ᳲ स इन्द्रोऽमन्यतानया वा इदं ँविष्णुः सहस्रं ँवक्ष्यत

इति तस्यामकल्पेतां द्विभाग इन्द्रस्तृतीये विष्णुस्तद्वा एषाऽभ्यनूच्यत

उभा जिग्यथुरिति तां ँवा एतामच्छावाक – [ ] 18

**7.1.5.6**

एव शᳲसत्यथ या सहस्रतमी सा होत्रे देयेति होतारं ँवा

अभ्यतिरिच्यते यदतिरिच्यते होता ऽनाप्तस्याऽऽ*पयिता ऽथाऽ*हुरुन्नेत्रे

देयेत्यतिरिक्ता वा एषा सहस्रस्यातिरिक्त उन्नेतर्त्विजामथाऽऽ*हुः

सर्वेभ्यः सदस्येभ्यो देयेत्यथाऽऽहुरुदा कृत्या सा वशं

चरेदित्यथाऽऽ*हुर्ब्रह्मणे चाग्नीधे च देयेति – [ ] 19

**7.1.5.7**

द्विभागं ब्रह्मणे तृतीयमग्नीध ऐन्द्रो वै ब्रह्मा वैष्णवोऽग्नीद्यथैव तावकल्पेतामित्यथाऽऽ*हुर्या कल्याणी बहुरूपा सा देयेत्यथाऽऽ*हुर्या द्विरूपोभयत एनी सा देयेति सहस्रस्य परिगृहीत्यै तद्वा एतथ् सहस्रस्याऽयनꣳ सहस्रꣲ स्तोत्रीयाः सहस्रं दक्षिणाः सहस्रसम्मितः सुवर्गो लोकः सुवर्गस्य लोकस्याभिजित्यै । **20**

*(अब्रवी - च्च - तदन्तरिक्षं - ददात्य - च्छावाक - श्च देयेति - सप्तचत्वारिꣳशच्च) (A5)*

**7.1.6.1**

सोमो वै सहस्रमविन्दत् तमिन्द्रो ऽन्वविन्दत् तौ यमो न्यागच्छत् तावब्रवीदस्तु मेऽत्राऽपीत्यस्तु ही(3) इत्यब्रूताꣳ स यम एकस्यांꣳ वीर्यं पर्यपश्यदियं वा अस्य सहस्रस्य वीर्यं बिभर्तीति तावब्रवीदियं ममास्त्वेतद्-युवयोरिति तावब्रूताꣳ सर्वे वा एतदेतस्यांꣳ वीर्यं - [ ] **21**

**7.1.6.2**

परि पश्यामोऽ॒ꣳशमा ह॒राम॒हा इ॒ति त॒स्याम॒ꣳशमा॒ऽहरन्त॒ ताम॒प्सु

प्राऽवे॒शय॒न्थ् सोमा॒यो॒देही॒ति सा रोहिणी पि॒ङ्गलैकहायनी रू॒पं कृ॒त्वा

त्रयस्त्रिꣳशता च त्रि॒भिश्च श॒तैः स॒होदैत् तस्मा॒द्-रोहिण्या

पि॒ङ्गलयैकहायन्या॒ सोमं क्रीणीयाद्य॒ ए॒वं ँवि॒द्वान् रोहिण्या

पि॒ङ्गलयैकहायन्या॒ सोमं क्रीणा॒ति॒ त्रयस्त्रिꣳशता चै॒वास्य

त्रि॒भिश्च – [ ] **22**

**7.1.6.3**

श॒तैः सोमः क्री॒तो भव॒ति सुक्रीतेन यज॒ते ताम॒प्सु प्रावे॒शय॒–

न्निन्द्रा॒यो॒देही॒ति सा रोहिणी लक्ष्म॒णा पष्ठौ॒ही वार्त्रघ्नी रू॒पं कृ॒त्वा

त्रयस्त्रिꣳशता च त्रि॒भिश्च श॒तैः स॒होदैत् तस्मा॒द् रोहिणीं ँलक्ष्म॒णां

प॒ष्ठौहीं ँवार्त्रघ्नीं द॒द्याद्य॒ ए॒वं ँवि॒द्वान् रोहिणीं ँलक्ष्म॒णां प॒ष्ठौहीं ँवार्त्रघ्नीं॒

ददा॒ति त्रयस्त्रिꣳशच्चै॒वास्य॒ त्रीणि च श॒ता॒नि सा द॒त्ता – [ ] **23**

**7.1.6.4**

भव॒ति ताम॒प्सु प्रावे॒शय॒न् य॒मा॒यो॒देही॒ति सा जरती मू॒र्खा तज्जघ॒न्या

रू॒पं कृ॒त्वा त्रयस्त्रिꣳशता च त्रि॒भिश्च श॒तैः स॒होदैत् तस्मा॒ज्जरतीं

मूर्खा तज्जघन्या-मनुस्तरणीं कुर्वीत य एवं ँविद्वाञ्जरतीं मूर्खा तज्जघन्या-मनुस्तरणीं कुरुते त्रयस्त्रि९्शच्चैवास्य त्रीणि च शतानि साऽमुष्मिन् ँलोके भवति वागेव सहस्रतमी तस्मा - [ ] 24

7.1.6.5

द्वरो देयः सा हि वरः सहस्रमस्य सा दत्ता भवति तस्माद् वरो न प्रतिगृह्यः सा हि वरः सहस्रमस्य प्रतिगृहीतं भवतीयं ँवर इति ब्रूयादथान्यां ब्रूयादियं ममेति तथाऽस्य तथ् सहस्र-मप्रतिगृहीतं भवत्युभयत एनी स्यात् तदाहुरन्यत एनी स्याथ् सहस्रं परस्तादेतमिति यैव वरः - [ ] 25

7.1.6.6

कल्याणी रूपसमृद्धा सा स्याथ् सा हि वरः समृद्ध्यै तामुत्तरेणाऽऽ*ग्नीध्रं पर्याणीयाऽऽ*हवनीयस्यान्ते द्रोणकलशमव घ्रापयेदा जिघ्र कलशं मह्युरुधारा पयस्वत्या त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः सा मा सहस्र आ भज प्रजया पशुभिः सह पुनर्मा ऽऽ*विशताद्-रयिरिति प्रजयैवैनं पशुभी रय्या स - [ ] 26

**7.1.6.7**

-मर्धयति प्रजावान् पशुमान् रयिमान् भवति य एवं वेद तया सहाऽऽग्नीध्रं परेत्य पुरस्तात् प्रतीच्यां तिष्ठन्त्यां जुहुयादुभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः । इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथामिति त्रेधाविभक्तं वै त्रिरात्रे सहस्र॑ साहस्रीमेवैनां करोति सहस्रस्यैवैनां मात्रां - [ ] **27**

**7.1.6.8**

करोति रूपाणि जुहोति रूपैरेवैना॑ समर्धयति तस्या उपोत्थाय कर्णमा जपेदिडे रन्तेऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुत्येतानि ते अघ्निये नामानि सुकृतं मा देवेषु ब्रूतादिति देवेभ्य एवैनमा वेदयत्यन्वेनं देवा बुध्यन्ते । **28**

*( एतदेतस्यां वीर्य - मस्य त्रिभिश्च - दत्ता - सहस्रतमी तस्मा - देव वरः - सं - मात्रा - मेकान्न चत्वारि॑शच्च) (A6)*

**7.1.7.1**

सहस्रतम्या वै यजमानः सुवर्गं लोकमेति सैन॑ सुवर्गं लोकं गमयति सा मा सुवर्गं लोकं गमयेत्याह सुवर्गमेवैनं लोकं गमयति

सा मा ज्योतिष्मन्तं ँल्लोकं गमयेत्याह ज्योतिष्मन्तमेवैनं ँल्लोकं गमयति सा मा सर्वान् पुण्यां ँल्लोकान् गमयेत्याह सर्वानेवैनं पुण्यां ँल्लोकान् गमयति सा – [ ] **29**

**7.1.7.2**

मा प्रतिष्ठां गमय प्रजया पशुभिः सह पुनर्माऽऽ विशताद्–रयिरिति प्रजयैवैनं पशुभी रय्यां प्रति ष्ठापयति प्रजावान् पशुमान् रयिमान् भवति य एवं ँवेद तामग्नीधे वा ब्रह्मणे वा होत्रे वोद्गात्रे वाऽद्ध्वर्यवे वा दद्याथ् सहस्रमस्य सा दत्ता भवति सहस्रमस्य प्रतिगृहीतं भवति यस्तामविद्वान् – [ ] **30**

**7.1.7.3**

प्रतिगृह्णाति तां प्रतिगृह्णीयादेकाऽसि न सहस्रमेकां त्वा भूतां प्रति गृह्णामि न सहस्रमेका मा भूताऽऽ विश मा सहस्रमित्येकामेवैनां भूतां प्रतिगृह्णाति न सहस्रं ँय एवं ँवेद स्योनाऽसि सुषदा सुशेवा स्योना मा ऽऽविश सुषदा मा ऽऽविश सुशेवा मा ऽऽविशे –[ ] **31**

**7.1.7.4**

-त्याह स्योनैवैनꣳ सुषदा सुशेवा भूताऽऽ विशति नैनꣳ हिनस्ति ब्रह्मवादिनो वदन्ति सहस्रꣳ सहस्रतम्यन्वेती(3) सहस्रतमीꣳ सहस्रा(3)मिति यत् प्राचीमुथ् सृजेथ् सहस्रꣳ सहस्रतम्यन्वियात् तथ् सहस्रमप्रज्ञात्रꣳ सुवर्गं ँलोकं न प्र जानीयात् प्रतीचीमुथ्-सृजति ताꣳ सहस्रमनु पर्यावर्तते सा प्रजानती सुवर्गं ँलोकमेति यजमान ( ) -मभ्युथ् सृजति क्षिप्रे सहस्रं प्र जायत उत्तमा नीयते प्रथमा देवान् गच्छति । **32**

*(लोकान् गमयति सा - ऽविद्वान्थ् - सुशेवा माऽऽ विश - यजमानं - द्वादश च) (A7)*

**7.1.8.1**

अत्रिरददादौर्वाय प्रजां पुत्रकामाय स रिरिचानोऽमन्यत निर्वीर्यः शिथिलो यातयामा स एतं चतूरात्र-मपश्यत् तमाऽहरत् तेनायजत ततो वै तस्य चत्वारो वीरा आऽजायन्त सुहोता सूद्गाता स्वध्वर्युः सुसभेयो य एवं ँविद्वाꣳश्चतूरात्रेण यजत आऽस्य चत्वारो वीरा

जायन्ते सुहोता सूद्गाता स्वद्ध्वर्युः सुसभेयो ये चतुर्विꣳशाः पवमाना ब्रह्मवर्चसं त – [ ] 33

**7.1.8.2**

– द्य उद्यन्तः स्तोमाः श्रीः सा ऽत्रिꣳ श्रद्धादेवं यँजमानं चत्वारि वीर्याणि नोपाऽनमन् तेज इन्द्रियं ब्रह्मवर्चस-मन्नाद्यꣳ स एताꣳश्चतुरश्चतुष्टोमान्थ् सोमान-पश्यत् तानाऽहरत् तैरयजत तेज एव प्रथमेना ऽवारुन्धेन्द्रियं द्वितीयेन ब्रह्मवर्चसं तृतीयेनान्नाद्यं चतुर्थेन य एवं विँद्वाꣳश्चतुरश्चतुष्टोमान्थ् सोमानाहरति तैर्यजते तेज एव ( ) प्रथमेनाव रुन्ध इन्द्रियं द्वितीयेन ब्रह्मवर्चसं तृतीयेनाऽन्नाद्यं चतुर्थेन यामेवात्रिर्. ऋद्धिमाद्ध्र्नोत् तामेव यजमान ऋध्नोति । 34

*( तत् – तेज एवा – ष्टादश च) (A8)*

**7.1.9.1**

जमदग्निः पुष्टिकाम-श्चतूरात्रेणा-यजत स एतान् पोषाꣳ अपुष्यत् तस्मात् पलितौ जामदग्नियौ न सं जानाते एतानेव पोषान् पुष्यति य एवं विँद्वाꣳश्चतूरात्रेण यजते पुरोडाशिन्य उपसदो भवन्ति पशवो वै

पुरोडाशः पशूनेवाव रुन्धे ऽन्नं वै पुरोडाशोऽन्नमेवाव रुन्धे ऽन्नादः पशुमान् भवति य एवं विद्वाꣳश्चतूरात्रेण यजते । **35**

*(जमदग्नि - रष्टाचत्वारिꣳशत्) (A9)*

**7.1.10.1**

सँवथ्सरो वा इदमेक आसीथ् सोऽकामयतर्तून्थ् सृजेयेति स एतं पञ्चरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै स ऋतूनसृजत य एवं विद्वान् पञ्चरात्रेण यजते प्रैव जायते त ऋतवः सृष्टा न व्यावर्तन्त त एतं पञ्चरात्रमपश्यन् तमाऽहरन् तेनायजन्त ततो वै ते व्यावर्तन्त-[ ] **36**

**7.1.10.2**

य एवं विद्वान् पञ्चरात्रेण यजते वि पाप्मना भ्रातृव्येणाऽऽ* वर्तते सार्वसेनिः शौचेयोऽकामयत पशुमान्थ् स्यामिति स एतं पञ्चरात्रमाऽहरत् तेनाऽयजत ततो वै स सहस्रं पशून् प्राऽऽ*प्नोद्य एवं विद्वान् पञ्चरात्रेण यजते प्र सहस्रं पशूनाप्नोति बबरः प्रावाहणि-रकामयत वाचः प्रवदिता स्यामिति स एतं

पञ्चरात्रमा - [ ] 37

**7.1.10.3**

ऽहरत् तेनायजत ततो वै स वाचः प्रवदिताऽभवद्य एवं ँविद्वान् पञ्चरात्रेण यजते प्रवदितैव वाचो भवत्यथो एनं ँवाचस्पति-रित्याहुरनाप्त-श्चतूरात्रोऽतिरिक्तः षड्-रात्रोऽथ वा एष संप्रति यज्ञो यत् पञ्चरात्रो य एवं ँविद्वान् पञ्चरात्रेण यजते संप्रत्येव यज्ञेन यजते पञ्चरात्रो भवति पञ्च वा ऋतवः सँँवथ्सर - [ ] 38

**7.1.10.4**

ऋतुष्वेव सँँवथ्सरे प्रति तिष्ठत्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्धे सप्तदशो भवत्यन्नाद्यस्या-वरुद्ध्या अथो प्रैव तेन जायते पञ्चवि॒ँशो ऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवा-नन्नाद्यस्या-वरुध्यै विश्वजिथ् सर्वपृष्ठो-ऽतिरात्रो भवति सर्वस्याभिजित्यै ( ) । 39

*(ते व्यावर्तन्त - प्रवदिता स्यामिति स एतं पञ्चरात्रमा -*

*संँवथ्सरो- भिजित्यै) (A10)*

**7.1.11.1**

देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामा दद

इमामगृभ्णन् रशनामृतस्य पूर्व आयुषि विदथेषु कव्या ।

तया देवाः सुतमा बभूवुर् ऋतस्य सामन्थ्-सरमारपन्ती ।

अभिधा असि भुवनमसि यन्ताऽसि धर्ताऽसि सोऽग्निं वैँश्वानर॑ं

सप्रथसं गच्छ स्वाहाकृतः पृथिव्यां यँन्ता राड् यन्ताऽसि यमनो

धर्ताऽसि धरुणः ( ) कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा

पृथिव्यै त्वा ऽन्तरिक्षाय त्वा दिवे त्वा सते त्वाऽसते त्वाद्भ्यस्त्वौ-

षधीभ्यस्त्वा विश्वेभ्यस्त्वा भूतेभ्यः । **40**

*(धरुणः - पञ्चविं॑शतिश्च) (A11)*

**7.1.12.1**

विभूर्मात्रा प्रभूः पित्राश्वोऽसि हयोऽस्यत्योऽसि नरोऽस्यर्वाऽसि

सप्तिरसि वाज्यसि वृषाऽसि नृमणा असि ययुर्नामास्यादित्यानां

पत्वान्विह्यग्नये स्वाहा स्वाहेन्द्राग्निभ्या॑ं स्वाहा प्रजापतये स्वाहा

विश्वेभ्यो देवेभ्यः स्वाहा सर्वाभ्यो देवताभ्य इह धृतिः स्वाहेह
विधृतिः स्वाहेह रन्तिः स्वाहे ( ) –ह रमतिः स्वाहा भूरसि भुवे
त्वा भव्याय त्वा भविष्यते त्वा विश्वेभ्यस्त्वा भूतेभ्यो देवा आशापाला
एतं देवेभ्योऽश्वं मेधाय प्रोक्षितं गोपायत । **41**

*(रन्तिः स्वाहा – द्वाविꣳशतिश्च] (A12)*

**7.1.13.1**

आयनाय स्वाहा प्रायणाय स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा
शूकाराय स्वाहा शूकृताय स्वाहा पलायिताय स्वाहा ऽऽपलायिताय
स्वाहा ऽऽवल्गते स्वाहा परावल्गते स्वाहा ऽऽयते स्वाहा प्रयते स्वाहा
सर्वस्मै स्वाहा । **42**

*(आयनायोत्तरमापलायिताय षड्विꣳशतिः) (A13)*

**7.1.14.1**

अग्नये स्वाहा सोमाय स्वाहा वायवे स्वाहा ऽपां मोदाय स्वाहा
सवित्रे स्वाहा सरस्वत्यै स्वाहे–न्द्राय स्वाहा बृहस्पतये स्वाहा
मित्राय स्वाहा वरुणाय स्वाहा सर्वस्मै स्वाहा । **43**

*(अग्नये वायवेऽपां मोदायेन्द्राय त्रयोविꣳशतिः) (A14)*

**7.1.15.1**

पृथिव्यै स्वाहा ऽन्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहा प्राच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहा प्रतीच्यै दिशे स्वाहो-दीच्यै दिशे स्वाहोद्ध्वायै दिशे स्वाहा दिग्भ्यः स्वाहा ऽवान्तरदिशाभ्यः स्वाहा समाभ्यः स्वाहा शरद्भ्यः स्वाहा ऽहोरात्रेभ्यः स्वाहा ऽर्धमासेभ्यः स्वाहा मासेभ्यः स्वाहार्तुभ्यः स्वाहा सँवथ्सराय स्वाहा सर्वस्मै स्वाहा । **44**

*(पृथिव्यै सूर्याय नक्षत्रेभ्यः प्राच्यै सप्तचत्वारिꣳशत्) (A15)*

**7.1.16.1**

अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहा ऽपां मोदाय स्वाहा वायवे स्वाहा मित्राय स्वाहा वरुणाय स्वाहा सर्वस्मै स्वाहा । **45**

*(अग्नये सवित्रे पूष्णोऽपां मोदाय वायवे त्रयोविꣳशतिः) (A16)*

**7.1.17.1**

पृथिव्यै स्वाहा ऽन्तरिक्षाय स्वाहा दिवे स्वाहा ऽग्नये स्वाहा सोमाय स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा ऽह्ने स्वाहा रात्रियै स्वाहर्जवे स्वाहा साधवे स्वाहा सुक्षित्यै स्वाहा क्षुधे स्वाहा ऽऽशितिम्ने स्वाहा रोगाय स्वाहा हिमाय स्वाहा शीताय स्वाहा ऽऽतपाय स्वाहा ऽरण्याय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा । **46**

*(पृथिव्या अग्नयेऽह्ने रात्रियै चतुश्चत्वारिꣳशत्) (A17)*

**7.1.18.1**

भुवो देवानां कर्मणाऽपसर्तस्य पथ्याऽसि वसुभि-र्देवेभि-र्देवतया गायत्रेण त्वा छन्दसा युनज्मि वसन्तेन त्वर्तुना हविषा दीक्षयामि रुद्रेभि-र्देवेभि-र्देवतया त्रैष्टुभेन त्वा छन्दसा युनज्मि ग्रीष्मेण त्वर्तुना हविषा दीक्षया-म्यादित्येभि-र्देवेभि-र्देवतया जागतेन त्वा छन्दसा युनज्मि वर्.षाभिस्त्वर्तुना हविषा दीक्षयामि विश्वेभि-र्देवेभि-र्देवतया ऽऽनुष्टुभेन त्वा छन्दसा युनज्मि - [ ] **47**

**7.1.18.2**

शरदा त्वर्तुना हविषा दीक्षयाम्यङ्गिरोभि-र्देवेभि-र्देवतया

पाङ्क्तेन त्वा छन्दसा युनज्मि हेमन्तशिशिराभ्यां त्वर्तुना हविषा

दीक्षयाम्याऽहं दीक्षामरुहमृतस्य पत्नीं गायत्रेण छन्दसा

ब्रह्मणा चर्तं॒ सत्येऽधां॒ सत्यमृतेऽधां ।

महीमू षु> 1 सुत्रामाण > 2 -मिह धृतिः स्वाहेह विधृतिः स्वाहेह

रन्तिः स्वाहेह रमतिः स्वाहा । **48**

*(आनुष्टुभेन त्वा छन्दसा युनज्म्यो - कान्न पञ्चाशच्च) (A18)*

**7.1.19.1**

ईंकाराय स्वाहें कृताय स्वाहा क्रन्दते स्वाहा ऽवक्रन्दते स्वाहा

प्रोथते स्वाहा प्रप्रोथते स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा

प्राणाय स्वाहा व्यानाय स्वाहा ऽपानाय स्वाहा सन्दीयमानाय स्वाहा

सन्दिताय स्वाहा विचृत्यमानाय स्वाहा विचृत्ताय स्वाहा

पलायिष्यमाणाय स्वाहा पलायिताय स्वाहोपरं॒स्यते स्वाहोपरताय

स्वाहा निवेक्ष्यते स्वाहा निविशमानाय स्वाहा निविष्टाय स्वाहा

निषथ्स्यते स्वाहा निषीदते स्वाहा निषण्णाय स्वाहा – [ ] **49**

**7.1.19.2**

ऽऽसिष्यते स्वाहा ऽऽसीनाय स्वाहा ऽऽसिताय स्वाहा निपथ्स्यते
स्वाहा निपद्यमानाय स्वाहा निपन्नाय स्वाहा शयिष्यते स्वाहा
शयानाय स्वाहा शयिताय स्वाहा संमीलिष्यते स्वाहा संमीलते
स्वाहा संमीलिताय स्वाहा स्वफ्स्यते स्वाहा स्वपते स्वाहा सुप्ताय
स्वाहा प्रभोथ्स्यते स्वाहा प्रबुध्यमानाय स्वाहा प्रबुद्धाय स्वाहा
जागरिष्यते स्वाहा जाग्रते स्वाहा जागरिताय स्वाहा शुश्रूषमाणाय
स्वाहा शृण्वते स्वाहा श्रुताय स्वाहा वीक्षिष्यते स्वाहा – [ ] **50**

**7.1.19.3**

वीक्षमाणाय स्वाहा वीक्षिताय स्वाहा स॒ँहास्यते स्वाहा संजिहानाय
स्वाहो–ज्जिहानाय स्वाहा विवर्थ्स्यते स्वाहा विवर्तमानाय स्वाहा
विवृत्ताय स्वाहो–त्थास्यते स्वाहोत्तिष्ठते स्वाहोत्थिताय स्वाहा
विधविष्यते स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहो–त्क्र॒ँस्यते
स्वाहोत्क्रामते स्वाहोत्क्रान्ताय स्वाहा चङ्क्रमिष्यते स्वाहा

चङ्क्रम्यमाणाय स्वाहा चङ्क्रमिताय स्वाहा कण्डूयिष्यते स्वाहा कण्डूयमानाय स्वाहा कण्डूयिताय स्वाहा निकषिष्यते स्वाहा निकषमाणाय स्वाहा ( ) निकषिताय स्वाहा यदत्ति तस्मै स्वाहा यत् पिबति तस्मै स्वाहा यन्मेहति तस्मै स्वाहा यच्छकृत् करोति तस्मै स्वाहा रेतसे स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा सर्वस्मै स्वाहा । **51** *(निषण्णाय स्वाहा - वीक्षिष्यते स्वाहा - निकषमाणाय स्वाहा - सप्तविꣳशतिश्च) (A19)*

**7.1.20.1**

अग्नये स्वाहा वायवे स्वाहा सूर्याय स्वाहा-र्तमस्यृतस्यर्तमसि सत्यमसि सत्यस्य सत्यमस्यृतस्य पन्था असि देवानां छायाऽमृतस्य नाम तथ् सत्यं यँत् त्वं प्रजापतिरस्यधि यदस्मिन् वाजिनीव शुभः स्पर्द्धन्ते दिवः सूर्येण विशोऽपो वृणानः पवते कव्यन् पशुं न गोपा इर्यः परिज्मा । **52**

*(अग्नये वायवे सूर्याया - ऽष्टाचत्वारिꣳशत्) (A20)*

**Prasna Korvai with starting Padams of 1 to 20 Anuvaakams :-**

(प्रजननं – प्रातः सवने वै – ब्रह्मवादिनः स त्वा – अङ्गिरस– आपो वै – सोमो वै – सहस्रतम्या – त्रि – र्जमदग्निः – सँवथ्सरो – देवस्य –विभू – रायनाया– ऽग्नये – पृथिव्या – अग्नये – पृथिव्यै – भुव – ईंकाराया – ग्नये वायवे सूर्याय – विꣳशतिः )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(प्रजनन – मङ्गिरसः – सोमो वै – प्रतिगृह्णाति – विभू – वीक्षमाणाय – द्विपञ्चाशत्)

**First and Last Padam of First Prasnam of 7th Kandam**

(प्रजननं – परिज्मा)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां सप्तमकाण्डे प्रथमः प्रश्नः समाप्तः ॥

---

## 7.1.1 Appendix

**7.1.18.2 – म॒ही॒मू॒षु>[1] सु॒त्रामा॑ण >[2]**

म॒ही॒मू॒षु मा॒तर॑ꣳ सुव्र॒ताना॑मृ॒तस्य॒ पत्नी॒मव॑से हुवेम ।
तु॒वि॒क्ष॒त्राम॒जर॑न्तीमु॒रूची॒ꣳ सु॒शर्मा॑ण॒मदि॑तिꣳ सु॒प्रणी॑तिं ॥

सु॒त्रामा॑णं पृ॒थिवीं द्याम॑ने॒हस॑ꣳ सु॒शर्मा॑ण॒ मदि॑तिꣳ सु॒प्रणी॑तिं ।
दैवीं॒ नाव॑ꣳ स्वरि॒त्राम॑नागस॒मस्र॑वन्ती॒मा रु॑हेमा स्व॒स्तये᳚ ॥

**(Appearing in T.S.1.5.11.5)**

ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः

हरिः ओं

## 7.2 सप्तमकाण्डे द्वितीयः प्रश्नः - षड् रात्राद्यानां निरूपणं

**7.2.1.1**

साध्या वै देवाः सुवर्गकामा एतꣳ षड्-रात्रमपश्यन् तमाऽहरन्
तेनायजन्त ततो वै ते सुवर्गं ँलोकमायन् य एवं ँविद्वाꣳसः
षड्-रात्रमासते सुवर्गमेव लोकं ँयन्ति देवसत्रं ँवै षड्-रात्रः
प्रत्यक्षꣳ ह्येतानि पृष्ठानि य एवं ँविद्वाꣳसः षड्-रात्रमासते
साक्षादेव देवता अभ्यारोहन्ति षड्-रात्रो भवति षड् वा ऋतवः
षट् पृष्ठानि - [ ] **1**

**7.2.1.2**

पृष्ठैरेवर्तून्-न्वारोहन्त्यृतुभिः सँवथ्सरं ते सँवथ्सर एव प्रति तिष्ठन्ति
बृहद्-रथन्तराभ्यां ँयन्तीयं ँवाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो
अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव

सुवर्गं ँल्लोकं ँयन्ति त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धते

पञ्चदशो भवतीन्द्रियमेवाव रुन्धते सप्तदशो- [ ] **2**

**7.2.1.3**

भव-त्यन्नाद्यस्या-वरुद्ध्या अथो प्रैव तेन जायन्त एकवि॒ꣳशो

भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् दधते त्रिणवो भवति विजित्यै

त्रयस्त्रि॒ꣳशो भवति प्रतिष्ठित्यै सदोहविर्द्धानिन एतेन षड्-रात्रेण

यजेरन्नाश्वत्थी हविर्द्धानं चाऽऽ*ग्नीध्रं च भवतस्तद्धि सुवर्ग्यं

चक्रीवती भवतः सुवर्गस्य लोकस्य समष्ट्या उलूखलबुध्नो यूपो

भवति प्रतिष्ठित्यै प्राञ्चो यान्ति प्राङिव हि सुवर्गो - [ ] **3**

**7.2.1.4**

लोकः सरस्वत्या यान्त्येष वै देवयानः पन्थास्त-मेवा-

न्वारोहन्त्याक्रोशन्तो यान्त्यवर्ति-मेवान्यस्मिन् प्रतिषज्य प्रतिष्ठां

गच्छन्ति यदा दश शतं कुर्वन्त्यथैक-मुत्थान॒ꣳ शतायुः पुरुषः

शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्ति यदा शत॒ꣳ सहस्रं

कुर्वन्त्यथैक-मुत्थान॒ꣳ सहस्रसंमितो वा असौ लोकोऽमुमेव लोकमभि जयन्ति यदै ( ) -षां प्रमीयेत यदा वा जीयेरन्नथैक - मुत्थानं तद्धि तीर्थं । 4 *(पृष्ठानि - सप्तदशः - सुवर्गो - जयन्ति यदै - कादश च) (A1)*

**7.2.2.1**

कुसुरुबिन्द औद्दालकिरकामयत पशुमान्थ् स्यामिति स एत॒ꣳ सप्तरात्रमाऽहरत् तेनायजत तेन वै स यावन्तो ग्राम्याः पशवस्तानवा-रुन्ध य एवं ँविद्वान्थ् सप्तरात्रेण यजते यावन्त एव ग्राम्याः पशवस्तानेवाव रुन्धे सप्तरात्रो भवति सप्त ग्राम्याः पशवः सप्ताऽऽ*रण्याः सप्त छन्दा॑ꣳसि-स्युभयस्या-वरुद्ध्यै त्रिवृदग्निष्टोमो भवति तेज - [ ] 5

**7.2.2.2**

एवाव रुन्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्धे सप्तदशो भवत्यन्नाद्यस्या वरुद्ध्या अथो प्रैव तेन जायत एकवि॒ꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽ*त्मन् धत्ते त्रिणवो भवति विजित्यै

पञ्चवि॒ꣳशो᳚ऽग्निष्टो॒मो भ॑वति प्र॒जाप॑ते॒राप्त्यै॑ महाव्र॒तवा॑न॒न्नाद्य॒स्या

व॑रुद्ध्यै विश्व॒जित् स॒र्वपृ॑ष्ठोऽतिरा॒त्रो भ॑वति॒ सर्व॒स्याभि॑जि॒त्यै॒ यत्

प्र॒त्य॒क्षं पू॒र्वेष्वहः॑ सु पृ॒ष्ठान्यु॒पेयुः॑ प्र॒त्यक्षं॑ -[ ] **6**

**7.2.2.3**

विश्व॒जि॒ति यथा॑ दु॒ग्धा-मु॒पसी॑दत्ये॒वमु॑त्तम-म॒हः स्या॒न्नैक॑रा॒त्रश्च॒न

स्या᳚द् बृहद्-रथन्त॒रे पू॒र्वे॒ष्वह॑ः सूप॒ यन्तीयं॒ वाव॑ रथन्त॒रम॒सौ

बृ॒ह॒दा॒भ्यामे॒व न य॒न्त्यथो॑ अ॒नयो॒रेव॒ प्रति॑ तिष्ठ॒न्ति यत् प्र॒त्यक्षं

विश्व॒जि॒ति पृ॒ष्ठान्यु॒प॒यन्ति॒ यथा॒ प्रत्तां॑ दु॒हे ता॒दृगे॒व तत् । **7**

*(तेज - उपेयुः प्रत्यक्षं - द्विचत्वारिꣳशच्च) (A2)*

**7.2.3.1**

बृ॒हस्पति॑रकामयत ब्रह्मवर्च॒सी स्या॒मि॒ति॒ स ए॒त-म॑ष्टरा॒त्र-म॑पश्य॒त्

तमाऽह॑रत् तेना॑यज॒त त॒तो वै स ब्र॑ह्मवर्च॒स्य॑भव॒द्य ए॒वं विद्वान॑ष्टरा॒त्रे॒ण

यज॑ते ब्रह्मवर्च॒स्ये॑व भवत्यष्टरा॒त्रो भ॑व॒त्यष्टाक्ष॑रा गाय॒त्री गा॒यत्री॑

ब्रह्मवर्च॒सं गा॑य॒त्रियै॒व ब्र॑ह्मवर्च॒सम॑व रु॒न्धेऽष्टरा॒त्रो भ॑व॒ति चत॒स्रो

वै दि॒शश्चत॒स्रो॑ऽवान्तरदि॒शा दि॒ग्भ्य ए॒व ब्र॑ह्मवर्च॒सम॑व रु॒न्धे-[ ] **8**

**7.2.3.2**

त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्धे सप्तदशो भवत्यन्नाद्यस्या-वरुद्ध्या अथो प्रैव तेन जायत एकवि॒ꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽ*त्मन् धत्ते त्रिणवो भवति विजित्यै त्रयस्त्रि॒ꣳशो भवति प्रतिष्ठित्यै पञ्चवि॒ꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्या वरुद्ध्यै विश्वजिथ् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै ( ) । **9**

*(दिग्भ्य एव ब्रह्मवर्चसमव रुन्धे - ऽभिजित्यै) (A3)*

**7.2.4.1**

प्रजापतिः प्रजा असृजत ताः सृष्टाः क्षुधं न्यायन्थ्स एतं नवरात्रपश्यत् तमाऽहरत् तेनायजत ततो वै प्रजाभ्योऽकल्पत यर्.हि प्रजाः क्षुधं निगच्छेयुस्तर्.हि नवरात्रेण यजेतेमे हि वा एतासां ँलोका अक्लृप्ता अथैताः क्षुधं नि गच्छन्तीमानेवाऽऽ*भ्यो लोकान् कल्पयति तान् कल्पमानान् प्रजाभ्योऽनु कल्पते कल्पन्ते - [ ] **10**

**7.2.4.2**

ऽस्मा इमे लोका ऊर्जं प्रजासु दधाति त्रिरात्रेणैवेमं ँल्लोकं कल्पयति त्रिरात्रेणान्तरिक्षं त्रिरात्रेणामुं ँल्लोकं ँयथा गुणे गुणमन्वस्यत्येवमेव तल्लोके लोकमन्वस्यति धृत्या अशिथिलंभावाय ज्योतिर्गौरायुरिति ज्ञाताः स्तोमा भवन्तीयं ँवाव ज्योतिरन्तरिक्षं गौरसावायुरेष्वेव लोकेषु प्रति तिष्ठन्ति ज्ञात्रं प्रजानां-[ ] **11**

**7.2.4.3**

गच्छति नवरात्रो भवत्यभिपूर्वमेवाऽस्मिन् तेजो दधाति यो ज्योगामयावी स्यात् स नवरात्रेण यजेत प्राणा हि वा एतस्या धृता अथैतस्य ज्योगामयति प्राणानेवास्मिन् दाधारोत यदीतासुर्भवति जीवत्येव । **12**

*(कल्पन्ते - प्रजनां - त्रयस्त्रि९ँशच्च) (A4)*

**7.2.5.1**

प्रजापतिरकामयत प्र जायेयेति स एतं दशहोतारमपश्यत् तमजुहोत् तेन दशरात्रमसृजत तेन दशरात्रेण प्रा जायत दशरात्राय दीक्षिष्यमाणो

दशहोतारं जुहुयाद्-दशहोत्रैव दशरात्रं सृजते तेन दशरात्रेण प्र जायते वैराजो वा एष यज्ञो यद्दशरात्रो य एवं ँविद्वान्-दशरात्रेण यजते विराजमेव गच्छति प्राजापत्यो वा एष यज्ञो यद्-दशरात्रो-[ ] **13**

**<u>7.2.5.2</u>**

य एवं ँविद्वान्-दशरात्रेण यजते प्रैव जायत इन्द्रो वै सदृङ् देवताभिरासीथ् स न व्यावृतमगच्छथ् स प्रजापतिमुपाधावत् तस्मा एतं दशरात्रं प्रायच्छत् तमाऽहरत् तेनायजत ततो वै सोऽन्याभि-र्देवताभि-र्व्यावृतमगच्छद्य एवं ँविद्वान् दशरात्रेण यजते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छति त्रिककुद्वा – [ ] **14**

**<u>7.2.5.3</u>**

एष यज्ञो यद्-दशरात्रः ककुत् पञ्चदशः ककुदेकविंशः ककुत् त्रयस्त्रिंशो य एवं ँविद्वान् दशरात्रेण यजते त्रिककुदेव समानानां भवति यजमानः पञ्चदशो यजमान एकविंशो यजमानस्त्रयस्त्रिंशः पुर इतरा अभिचर्यमाणो दशरात्रेण यजेत देवपुरा एव पर्यूहते तस्य न कुतश्चनोपाव्याधो भवति नैनमभिचरन्थ् स्तृणुते देवासुराः सँयत्ता

आसन् ते देवा एता - [ ] 15

**7.2.5.4**

देवपुरा अपश्यन् यद्-दशरात्रस्ताः पर्यौहन्त तेषां न कुतश्चनोपाव्याधो
ऽभवत् ततो देवा अभवन् पराऽसुरा यो भ्रातृव्यवान्थ् स्याथ् स
दशरात्रेण यजेत देवपुरा एव पर्यूहते तस्य न कुतश्चनोपाव्याधो
भवति भवत्यात्मना पराऽस्य भ्रातृव्यो भवति स्तोमः
स्तोमस्योपस्तिर्भवति भ्रातृव्यमेवोपस्तिं कुरुते जामि वा - [ ] 16

**7.2.5.5**

एतत् कुर्वन्ति यज्ज्याया॑ꣳस॒ꣳ स्तोममुपेत्य कनीया॑ꣳसमुपयन्ति
यदग्निष्टो-मसामान्यवस्ताच्च परस्ताच्च भवन्त्यजामित्वाय
त्रिवृदग्निष्टोमो ऽग्निष्टुदाग्नेयीषु भवति तेज एवाव रुन्धे पञ्चदश
उक्थ्य ऐन्द्रीष्विन्द्रियमेवाव रुन्धे त्रिवृदग्निष्टोमो वैश्वदेवीषु पुष्टिमेवाव
रुन्धे सप्तदशोऽग्निष्टोमः प्राजापत्यासु तीव्रसोमो ऽन्नाद्यस्या-वरुद्ध्या
अथो प्रैव तेन जायत - [ ] 17

**7.2.5.6**

एकवि॒ꣳश उ॒क्थ्यः॑ सौरी॒षु॒ प्रति॑ष्ठित्या॒ अथो॒ रुच॒मे॒वाऽऽ*त्मन् ध॑त्ते

सप्त॒द॒शोऽग्निष्टो॒मः प्रा॒जा॒प॒त्यासू॒पह॒व्य उ॒प॒ह॒वमे॒व ग॑च्छति

त्रि॒ण॒वा॒व॒ग्नि॒ष्टो॒मा॒व॒भित॒ ऐ॒न्द्रीषु॒ विजि॑त्यै त्रयस्त्रि॒ꣳश उ॒क्थ्यो॑

वैश्व॒दे॒वी॒षु॒ प्रति॑ष्ठित्यै विश्व॒जित् सर्वपृ॒ष्ठोऽति॒रा॒त्रो भ॑वति

सर्व॑स्या॒भिजि॑त्यै । 18

*(प्र॒जा॒पत्यो॒ वा ए॒ष य॒ज्ञो यद् द॒श॒रा॒त्र - स्त्रि॒ककु॒द्धा - ए॒ता - वै - जा॒य॒त - एकत्रि॒ꣳशच्च) (A5)*

**7.2.6.1**

ऋ॒त॒वो॒ वै प्र॒जाका॑माः प्र॒जां नाऽवि॑न्दन्त॒ तेऽकामयन्त प्र॒जाꣳ सृ॑जेमहि

प्र॒जाम॑व रुन्धीमहि प्र॒जां ँ विन्देमहि प्र॒जाव॑न्तः स्या॒मे॒ति त

ए॒तमे॑कादशरा॒त्रम॑पश्यन् तमाऽह॑रन् तेनायजन्त॒ तत॒ो वै ते प्र॒जाम॑सृजन्त

प्र॒जाम॑वारुन्धत प्र॒जाम॑विन्दन्त प्र॒जाव॑न्तोऽभवन्त ऋ॒तवो॒ऽभव॒न्

तदा॒र्त॒वाना॑-मार्त॒वत्व॑-मृ॒तूनां ँ वा ए॒ते पु॒त्रास्तस्मा॑ - [ ] 19

**7.2.6.2**

-दार्त॒वा उ॑च्यन्ते॒ य ए॒वं ँ वि॒द्वाꣳस॑ एकादशरा॒त्रमास॑ते प्र॒जामे॒व

सृजन्ते प्रजामव रुन्धते प्रजां ँविन्दन्ते प्रजावन्तो भवन्ति
ज्योतिरतिरात्रो भवति ज्योतिरेव पुरस्ताद्-दधते सुवर्गस्य लोकस्या-
नुख्यात्यै पृष्ठ्यः षडहो भवति षड् वा ऋतवः षट् पृष्ठानि
पृष्ठैरेवर्तून-न्वारोहन्त्यृतुभिः सँवथ्सरं ते सँवथ्सर एव प्रति तिष्ठन्ति
चतुर्वि॒ꣳशो भवति चतुर्वि॒ꣳशत्यक्षरा गायत्री – [ ] **20**

**7.2.6.3**

गायत्रं ब्रह्मवर्चसं गायत्रियामेव ब्रह्मवर्चसे प्रति तिष्ठन्ति चतुश्चत्वारि॒ꣳशो
भवति चतुष्चत्वारि॒ꣳशदक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुप् त्रिष्टुभ्येवेन्द्रिये प्रति
तिष्ठन्त्यष्टाचत्वारि॒ꣳशो भवत्यष्टाचत्वारि॒ꣳशदक्षरा जगती जागताः पशवो
जगत्यामेव पशुषु प्रति तिष्ठन्त्ये-कादशरात्रो भवति पञ्च वा ऋतव
आर्तवाः पञ्चर्तुष्वेवाऽऽ*र्तवेषु सँवथ्सरे प्रतिष्ठाय प्रजामव
रुन्धते ऽतिरात्रावभितो भवतः प्रजायै परिगृहीत्यै । **21**

*(तस्माद् - गायत्र्यो - कान्न पञ्चाशच्च) (A6)*

**7.2.7.1**

ऐन्द्रवायवाग्रान् गृह्णीयाद्यः कामयेत यथा पूर्वं प्रजाः कल्पेरन्निति

यज्ञस्य वै क्लृप्तिमनु प्रजाः कल्पन्ते यज्ञस्या-क्लृप्तिमनु न कल्पन्ते यथा पूर्वमेव प्रजाः कल्पयति न ज्याया७ंसं कनीयानति क्रामत्यैन्द्रवायवाग्रान् गृह्णीयादामयाविनः प्राणेन वा एष व्यृध्यते यस्याऽऽ*मयति प्राण ऐन्द्रवायवः प्राणेनैवैन७ं समर्धयति मैत्रावरुणाग्रान् गृह्णीरन् येषां दीक्षितानां प्रमीयेत-[ ] 22

**7.2.7.2**

प्राणापानाभ्यां ँवा एते व्यृध्यन्ते येषां दीक्षितानां प्रमीयते प्राणापानौ मित्रावरुणौ प्राणापानावेव मुखतः परि हरन्त आश्विनाग्रान् गृह्णीता ऽऽ*नुजावरोऽश्विनौ वै देवानामानुजावरौ पश्चेवाग्रं पर्यैता-मश्विनावेतस्य देवता य आनुजावर-स्तावेवैनमग्रं परि णयतः शुक्राग्रान् गृह्णीत गतश्रीः प्रतिष्ठाकामोऽसौ वा आदित्यः शुक्र एषोऽन्तोऽन्तं मनुष्यः - [ ] 23

**7.2.7.3**

श्रियै गत्वा नि वर्तते ऽन्तादेवाऽन्तमा रभते न ततः पापीयान् भवति मन्थ्यग्रान् गृह्णीता-भिचर-न्नार्तपात्रं ँवा एतद्-यन्-मन्थिपात्रं मृत्युनैवैनं ग्राहयति ताजगार्तिमार्च्छत्या-ग्रयणाग्रान् गृह्णीत यस्य पिता

पितामहः पुण्यः स्यादथ तन्न प्राप्नुयाद्-वाचा वा एष इन्द्रियेण व्यृध्यते यस्य पिता पितामहः पुण्यो - [ ] 24

<u>**7.2.7.4**</u>

भवत्यथ तन्न प्राप्नोत्युर इवैतद्-यज्ञस्य वागिव यदाग्रयणो वाचैवैनमिन्द्रियेण समर्धयति न ततः पापीयान् भवत्युक्थ्याग्रान् गृह्णीताभिचर्यमाणः सर्वेषां ँवा एतत् पात्राणामिन्द्रियं ँयदुक्थ्यपात्र७ँ सर्वेणैवैनमिन्द्रियेणाति प्रयुङ्क्ते सरस्वत्यभि नो नेषि वस्य इति पुरोरुचं कुर्याद्-वाग्वै - [ ] 25

<u>**7.2.7.5**</u>

सरस्वती वाचैवैनमति प्रयुङ्क्ते मा त्वत् क्षेत्राण्यरणानि गन्मेत्याह मृत्योर्वै क्षेत्राण्यरणानि तेनैव मृत्योः क्षेत्राणि न गच्छति पूर्णान् ग्रहान् गृह्णीयादामयाविनः प्राणान् वा एतस्य शुगृच्छति यस्याऽऽ*मयति प्राणा ग्रहाः प्राणानेवास्य शुचो मुञ्चत्युत यदीतासुर्भवति जीवत्येव पूर्णान् ग्रहान् ( ) गृह्णीयाद्-यर्.हि पर्जन्यो न वर्.षेत् प्राणान् वा एतर्.हि प्रजाना७ँ शुगृच्छति यर्.हि पर्जन्यो न

वर्.षति प्राणा ग्रहाः प्राणानेव प्रजाना॑ शुचो मुञ्चति ताजक् प्र वर्.षति । **26**

*(प्रमीयेत - मनुष्य - ऋद्ध्यते यस्य पिता पितामहः पुण्यो - वाग्वा - एव पूर्णान् ग्रहान् - पञ्चवि॑शतिश्च) (A7)*

**7.2.8.1**

गायत्रो वा ऐन्द्रवायवो गायत्रं प्रायणीय-महस्तस्मात् प्रायणीये-ऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति त्रैष्टुभो वै शुक्रस्त्रैष्टुभं द्वितीय-महस्तस्माद् द्वितीयेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णाति जागतो वा आग्रयणो जागतं तृतीय-महस्तस्मात् तृतीयेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्येतद्वै - [ ] **27**

**7.2.8.2**

यज्ञमापद्-यच्छन्दा॑स्याप्नोति यदाग्रयणः श्वो गृह्यते यत्रैव यज्ञमदृशन् तत एवैनं पुनः प्रयुङ्क्ते जगन्मुखो वै द्वितीयस्त्रिरात्रो जागत आग्रयणो यच्चतुर्थेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते राथन्तरो वा ऐन्द्रवायवो

राथन्तरं पञ्चममहस्तस्मात् पञ्चमेऽह - [ ] 28

**7.2.8.3**

-न्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति बार्.हतो वै शुक्रो बार्.हत७ षष्ठमहस्तस्माथ् षष्ठेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णात्येतद्वै द्वितीयं यँज्ञमापद्-यच्छन्दा७स्याप्नोति यच्छुक्रः श्वो गृह्यते यत्रैव यज्ञमदृशन् तत एवैनं पुनः प्रयुङ्क्ते त्रिष्टुङ्मुखो वै तृतीयस्त्रिरात्रस्त्रैष्टुभः - [ ] 29

**7.2.8.4**

शुक्रो यथ् सप्तमेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते वाग्वा आग्रयणो वागष्टममह-स्तस्मादष्टमेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णाति प्राणो वा ऐन्द्रवायवः प्राणो नवम-महस्तस्मान्नवमे ऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णात्येत - [ ] 30

**7.2.8.5**

-द्वै तृतीयं ँयज्ञमापद्-यच्छन्दाऽस्याप्नोति यदैन्द्रवायवः श्वो गृह्यते यत्रैव यज्ञमदृशन् तत एवैनं पुनः प्रयुङ्क्ते ऽथो स्वमेव छन्दोऽनु पर्यावर्तन्ते पथो वा एतेऽध्यपथेन यन्ति येऽन्येनैन्द्रवायवात् प्रतिपद्यन्तेऽन्तः खलु वा एष यज्ञस्य यद्-दशम-महर्दशमे ऽहन्नैन्द्रवायवो गृह्यते यज्ञस्यै-[ ] 31

**7.2.8.6**

-वान्तं गत्वा ऽपथात् पन्थामपि यन्त्यथो यथा वहीयसा प्रतिसारं ँवहन्ति तादृगेव तच्छन्दाऽस्यन्योऽन्यस्य लोकमभ्यध्यायन् तान्येतेनैव देवा व्यवाहयन्नैन्द्रवायवस्य वा एतदायतनं ँयच्चतुर्थमहस्तस्मि-न्नाग्रयणो गृह्यते तस्मादाग्रयणस्याऽऽ*यतने नवमेऽहन्नैन्द्रवायवो गृह्यते शुक्रस्य वा एतदायतनं ँयत् पञ्चम - [ ] 32

**7.2.8.7**

-महस्तस्मिन्नैन्द्रवायवो गृह्यते तस्मादैन्द्रवायवस्याऽऽ*यतने सप्तमेऽहञ्छुक्रो गृह्यत आग्रयणस्य वा एतदायतनं ँयथ् षष्ठमहस्तस्मिञ्छुक्रो गृह्यते तस्माच्छुक्रस्या ऽऽ*यतनेऽष्टमेऽहन्नाग्रयणो

गृह्यते छन्दाꣳस्येव तद्वि वाहयति प्र वस्यसो विवाहमाप्नोति य एवं

ꣳवेदाथो देवताभ्य एव यज्ञे सꣳविदं दधाति तस्मादिद-मन्योऽन्यस्मै

( ) दधाति । **33**

*(एतद्वै - पञ्चमेऽहन् - त्रैष्टुभ - एतद् - गृह्यते यज्ञस्य - पञ्चम - मन्यस्मा - एकञ्च) (A8)*

**7.2.9.1**

प्रजापतिरकामयत प्र जायेयेति स एतं द्वादशरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै स प्राजायत यः कामयेत प्र जायेयेति स द्वादशरात्रेण यजेत प्रैव जायते ब्रह्मवादिनो वदन्त्यग्निष्टोमप्रायणा यज्ञा अथ कस्मादतिरात्रः पूर्वः प्र युज्यत इति चक्षुषी वा एते यज्ञस्य यदतिरात्रौ कनीनिके अग्निष्टोमौ य - [ ] **34**

**7.2.9.2**

-दग्निष्टोमं पूर्वं प्रयुञ्जीरन् बहिर्धा कनीनिके दध्युस्तस्मादतिरात्रः पूर्वः प्र युज्यते चक्षुषी एव यज्ञे धित्वा मध्यतः कनीनिके प्रति

दधति यो वै गायत्रीं ज्योतिः पक्षां वेद ज्योतिषा भासा सुवर्गं
लोकमेति यावग्निष्टोमौ तौ पक्षौ येऽन्तरेऽष्टावुक्थ्याः स आत्मैषा वै
गायत्री ज्योतिः पक्षा य एवं वेद ज्योतिषा भासा सुवर्गं
लोक - [ ] **35**

**7.2.9.3**

-मेति प्रजापतिर्वा एष द्वादशधा विहितो यद् द्वादशरात्रो यावतिरात्रो
तौ पक्षौ येऽन्तरेऽष्टावुक्थ्याः स आत्मा प्रजापतिर्वावैष सन्थ्सद्ध
वै सत्रेण स्पृणोति प्राणा वै सत् प्राणानेव स्पृणोति सर्वासां वा एते
प्रजानां प्राणैरासते ये सत्रमासते तस्मात् पृच्छन्ति किमेते सत्रिण
इति प्रियः प्रजाना ( ) मुत्थितो भवति य एवं वेद । **36**

*(अग्निष्टोमौ यथ् - सुवर्गं लोकं - प्रियः प्रजानां -
पञ्च च) (A9)*

**7.2.10.1**

न वा एषोऽन्यतो वैश्वानरः सुवर्गाय लोकाय प्राभवदूर्ध्वो ह वा एष
आतत आसीत् ते देवा एतं वैश्वानरं पर्यौहन्थ् सुवर्गस्य लोकस्य

प्रभूत्या ऋतवो वा एतेन प्रजापतिमयाजयन् तेष्वाध्नोदधि तदृध्नोति
ह वा ऋत्विक्षु य एवं ँविद्वान् द्वादशाहेन यजते तेऽस्मिन्नैच्छन्त स
रसमह वसन्ताय प्रायच्छ - [ ] 37

**7.2.10.2**

द्यवं ग्रीष्मायौषधीर्वर्.षाभ्यो व्रीहीञ्छरदे माषतिलौ हेमन्तशिशिराभ्यां
तेनेन्द्रं प्रजापतिरयाजयत् ततो वा इन्द्र इन्द्रोऽभवत्
तस्मादाहुरानुजावरस्य यज्ञ इति स ह्येतेनाऽग्रेऽयजतैष ह वै
कुणपमत्ति यः सत्रे प्रतिगृह्णाति पुरुषकुणपमश्वकुणपं गौर्वा अन्नं
ँयेन पात्रेणान्नं बिभ्रति यत् तन्न निर्णेनिजति ततोऽधि - [ ] 38

**7.2.10.3**

मलं जायत एक एव यजेतैको हि प्रजापतिराध्नोद् द्वादश
रात्रीर्दीक्षितः स्याद् द्वादश मासाः सँवथ्सरः सँवथ्सरः प्रजापतिः
प्रजापतिर्वावैष एष ह त्वै जायते यस्तपसोऽधि जायते चतुर्धा वा
एतास्तिस्रस्तिस्रो रात्रयो यद् द्वादशोपसदो याः प्रथमा यज्ञं ताभिः
सं भरति या द्वितीया यज्ञं ताभिरा रभते - [ ] 39

**7.2.10.4**

यास्तृतीयाः पात्राणि ताभिर्निर्णेनिक्ते याश्चतुर्थीरपि ताभिरात्मानमन्तरतः शुन्धते यो वा अस्य पशुमत्ति मा॒ꣳस॒ꣳ सोऽत्ति यः पुरोडाशं मस्तिष्क॒ꣳ स यः परिवापं पुरीष॒ꣳ स य आज्यं मज्जान॒ꣳ स यः सोम॒ꣳ स्वेद॒ꣳ सोऽपि ह वा अस्य शीर्.षण्या निष्पदः प्रति गृह्णाति यो द्वादशाहे प्रतिगृह्णाति तस्माद् द्वादशाहेन ( ) न याज्यं पाप्मनो व्यावृत्त्यै । **40**

*(अयच्छ - दधि - रभते - द्वादशाहेन - चत्वारि च) (A10)*

**7.2.11.1**

एकस्मै स्वाहा द्वाभ्या॒ꣳ स्वाहा त्रिभ्यः स्वाहा चतुर्भ्यः स्वाहा पञ्चभ्यः स्वाहा षड्भ्यः स्वाहा सप्तभ्यः स्वाहा ऽष्टाभ्यः स्वाहा नवभ्यः स्वाहा दशभ्यः स्वाहै -कादशभ्यः स्वाहा द्वादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा षोडशभ्यः स्वाहा सप्तदशभ्यः स्वाहा ऽष्टादशभ्यः स्वाहै - कान्न वि॒ꣳशत्यै स्वाहा नववि॒ꣳशत्यै स्वाहै-कान्न चत्वारि॒ꣳशते स्वाहा नवचत्वारि॒ꣳशते स्वाहै-कान्न ( ) षष्ट्यै स्वाहा नवषष्ट्यै

स्वाहै –कान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा द्वाभ्या॑ शताभ्या॑ स्वाहा सर्वस्मै स्वाहा । **41**

*(नवचत्वारि॑ंशते स्वाहैकान्नै – कवि॑ंशतिश्च) (A11)*

**7.2.12.1**

एकस्मै स्वाहा त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा नवभ्यः स्वाहै– कादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा सप्तदशभ्यः स्वाहैकान्न वि॑ंशत्यै स्वाहा नववि॑ंशत्यै स्वाहैकान्न चत्वारि॑ंशते स्वाहा नवचत्वारि॑ंशते स्वाहैकान्न षष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्ना शीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा । **42**

*(एकस्मै त्रिभ्यः – पञ्चाशत्) (A12)*

**7.2.13.1**

द्वाभ्या॑ स्वाहा चतुर्भ्यः स्वाहा षड्भ्यः स्वाहा ऽष्टाभ्यः स्वाहा दशभ्यः स्वाहा द्वादशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा षोडशभ्यः स्वाहा ऽष्टादशभ्यः स्वाहा वि॑ंशत्यै स्वाहा ऽष्टानवत्यै

स्वाहा शताय स्वाहा सर्वस्मै स्वाहा । **43**

*(द्वाभ्यामष्टानवत्यै – षड्विꣳशतिः) (A13)*

**7.2.14.1**

त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा नवभ्यः स्वाहै–

कादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा

सप्तदशभ्यः स्वाहैकान्न विꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्न

चत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्न षष्ट्यै स्वाहा

नवषष्ट्यै स्वाहैकान्ना ऽशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय

स्वाहा शताय स्वाहा सर्वस्मै स्वाहा । **44**

*(त्रिभ्यो – ऽष्टाचत्वारिꣳशत्) (A14)*

**7.2.15.1**

चतुर्भ्यः स्वाहा ऽष्टाभ्यः स्वाहा द्वादशभ्यः स्वाहा षोडशभ्यः स्वाहा

विꣳशत्यै स्वाहा षण्णवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा । **45**

*(चतुर्भ्यः षण्णवत्यै – षोडश) (A15)*

**7.2.16.1**

पञ्चभ्यः स्वाहा दशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा विꣳशत्यै स्वाहा पञ्चनवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा । **46**

*(पञ्चभ्यः पञ्चनवत्यै - चतुर्दश) (A16)*

**7.2.17.1**

दशभ्यः स्वाहा विꣳशत्यै स्वाहा त्रिꣳशते स्वाहा चत्वारिꣳशते स्वाहा पञ्चाशते स्वाहा षष्ट्यै स्वाहा सप्तत्यै स्वाहा ऽशीत्यै स्वाहा नवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा । **47**

*(दशभ्यो - द्वाविꣳशतिः) (A17)*

**7.2.18.1**

विꣳशत्यै स्वाहा चत्वारिꣳशते स्वाहा षष्ट्यै स्वाहा ऽशीत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा । **48**

*(विꣳशत्यै - द्वादश) (A18)*

**7.2.19.1**

पञ्चाशते स्वाहा शताय स्वाहा द्वाभ्याꣳ शताभ्याꣳ स्वाहा त्रिभ्यः शतेभ्यः स्वाहा चतुर्भ्यः शतेभ्यः स्वाहा पञ्चभ्यः शतेभ्यः

स्वाहा षड्भ्यः शतेभ्यः स्वाहा सप्तभ्यः शतेभ्यः स्वाहा ऽष्टाभ्यः शतेभ्यः स्वाहा नवभ्यः शतेभ्यः स्वाहा सहस्राय स्वाहा सर्वस्मै स्वाहा । 49 *(पञ्चाशते – द्वात्रिँशत्) (A19)*

**7.2.20.1**

शताय स्वाहा सहस्राय स्वाहा ऽयुताय स्वाहा नियुताय स्वाहा प्रयुताय स्वाहा ऽर्बुदाय स्वाहा न्यर्बुदाय स्वाहा समुद्राय स्वाहा मध्याय स्वाहा ऽन्ताय स्वाहा परार्धाय स्वाहोषसे स्वाहा व्युष्ट्यै स्वाहोदेष्यते स्वाहोद्यते स्वाहोदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा । 50

*(शताया–ऽष्टात्रिँशत्) (A20)*

**Prasna Korvai with starting Padams of 1 to 20 Anuvaakams :-**

(साध्याः षड् रात्रं – कुसुरुबिन्दः सप्तरात्रं – बृहस्पतिरष्टरात्रं – प्रजापतिस्ताः क्षुधन्नवरात्रं – प्रजापतिरकामयत दशहोतारात्र – मृतव – ऐन्द्रवायवाग्रान् – गायत्रो वै – प्रजापतिः स द्वादशरात्रन् – न वा –एकस्मा – एकस्मै – द्वाभ्यान् – त्रिभ्यः – चतुर्भ्यः –

पञ्चभ्यो – दशभ्यो – विꣳशत्यै – पञ्चाशते – शताय – विꣳशतिः )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(साध्या – अस्मा इमे लोका – गायत्रं – ँवै तृतीय – मेकस्मै – पञ्चाशत् )

**First and Last Padam of Second Prasnam of 7th Kandam**

(साध्याः – सर्वस्मै स्वाहा )

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां सप्तमकाण्डे द्वितीयः प्रश्नः समाप्तः ॥

ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः

हरिः ओं

## 7.3 सप्तमकाण्डे तृतीयः प्रश्नः – सत्रजातनिरूपणं

**7.3.1.1**

प्रजवं ँवा एतेन यन्ति यद्–दशममहः पापावहीयं ँवा एतेन भवन्ति यद्–दशममहर्यो वै प्रजवं ँयतामपथेन प्रतिपद्यते यः स्थाणुꣳ हन्ति यो भ्रेषं न्येति स हीयते स यो वै दशमेऽहन्नविवाक्य उपहन्यते स हीयते तस्मै य उपहताय व्याह तमेवान्वारभ्य समश्नुतेऽथ यो व्याह स – [ ] 1

**7.3.1.2**

हीयते तस्माद्–दशमे ऽहन्नविवाक्य उपहताय न व्युच्यमथो खल्वाहुर्यज्ञस्य वै समृद्धेन देवाः सुवर्गं ँलोकमायन् यज्ञस्य व्यृद्धेनासुरान् पराऽभावयन्निति यत् खलु वै यज्ञस्य समृद्धं तद्–यजमानस्य यद्व्यृद्धं तद्भ्रातृव्यस्य स यो वै दशमेऽहन्नविवाक्य उपहन्यते स एवाति रेचयति ते ये बाह्या दृशीकवः – [ ] 2

**7.3.1.3**

स्युस्ते वि ब्रूयुर्यदि तत्र न विन्देयुरन्तः सदसाद्व्युच्यं ँयदि तत्र न
विन्देयुर्गृहपतिना व्युच्यं तद्व्युच्यमेवाथ वा एतथ् सर्पराज्ञिया
ऋग्भिः स्तुवन्तीयं ँवै सर्पतो राज्ञी यद्वा अस्यां किं चार्चन्ति
यदानृचुस्तेनेय॒ँ सर्पराज्ञी ते यदेव किं च वाचा
ऽऽनृचुर्यदतोऽध्यर्चितार – [ ] **3**

**7.3.1.4**

–स्तदुभयमाप्त्वा ऽवरुध्योत् तिष्ठामेति ताभिर्मनसा स्तुवते न वा
इमामश्वरथो नाऽश्वतरीरथः सद्यः पर्याप्तुमर्.हति मनो वा इमा॒ँ
सद्यः पर्याप्तुमर्.हति मनः परिभवितुमथ ब्रह्म वदन्ति परिमिता वा
ऋचः परिमितानि सामानि परिमितानि यजू॒ँष्यथैतस्यैवान्तो
नास्ति यद्–ब्रह्म तत् प्रतिगृणत आ चक्षीत स ( ) प्रतिगरः । **4**

*(व्याह स – दृशीकवो – ऽर्चितारः – स – एकं च) (A1)*

**7.3.2.1**

ब्रह्मवादिनो वदन्ति किं द्वादशाहस्य प्रथमेनाहर्त्विजां ँयजमानो
वृङ्क्त इति तेज इन्द्रियमिति किं द्वितीयेनेति प्राणानन्नाद्यमिति किं

तृतीयेनेति त्रीनिमान् ँल्लोकानिति किं चतुर्थेनेति चतुष्पदः पशूनिति किं पञ्चमेनेति पञ्चाक्षरां पङ्क्तिमिति कि॒ँ षष्ठेनेति षड् ऋतूनिति कि॒ँ सप्तमेनेति सप्तपदा॒ँ शक्वरीमिति – [ ] 5

**7.3.2.2**

किमष्टमेनेत्यष्टाक्षरां गायत्रीमिति किं नवमेनेति त्रिवृत॒ँ स्तोममिति किं दशमेनेति दशाक्षरां ँविराजमिति किमेकादशेनेत्येकादशाक्षरां त्रिष्टुभमिति किं द्वादशेनेति द्वादशाक्षरां जगतीमित्येतावद्वा अस्ति यावदेतद्-यावदेवास्ति तदेषां ँवृङ्क्ते । 6

*(शक्वरीमित्ये – कचत्वारि॒ँशच्च) (A2)*

**7.3.3.1**

एष वा आप्तो द्वादशाहो यत् त्रयोदशरात्रः समान॒ँ ह्येतदहर्यत् प्रायणीयश्चोदयनीयश्च त्र्यतिरात्रो भवति त्रय इमे लोका एषां ँल्लोकानामाप्त्यै प्राणो वै प्रथमोऽतिरात्रो व्यानो द्वितीयो ऽपानस्तृतीयः प्राणापानो-दानेष्वेवान्नाद्ये प्रति तिष्ठन्ति सर्वमायुर्यन्ति य एवं ँविद्वा॒ँस-स्त्रयोदशरात्र-मासते तदाहुर्वाग्वा एषा वितता – [ ] 7

**7.3.3.2**

यद् द्वादशाहस्तां ँविच्छिन्द्युर्यन्मध्ये ऽतिरात्रं कुर्युरुपदासुका गृहपतेर्वाख् स्या-दुपरिष्टाच्छन्दोमानां महाव्रतं कुर्वन्ति संततामेव वाचमव रुन्धतेऽनुपदासुका गृहपतेर्वाग्-भवति पशवो वै छन्दोमा अन्नं महाव्रतं ँयदुपरिष्टाच्छन्दोमानां महाव्रतं कुर्वन्ति पशुषु चैवान्नाद्ये च प्रति तिष्ठन्ति । 8

*(वितता - त्रिचत्वारिꣳशच्च) (A3)*

**7.3.4.1**

आदित्या अकामयन्तो-भयोर्लोकयोर् ऋध्नुयामेति त एतं चतुर्दशरात्र-मपश्यन् तमाऽहरन् तेनायजन्त ततो वै त उभयो-र्लोकयो-राध्र्नुवन्नस्मिꣳश्चा-मुष्मिꣳश्च य एवं ँविद्वाꣳस-श्चतुर्दशरात्रमासत उभयोरेव लोकयोर्. ऋध्नुवन्त्यस्मिꣳश्चा-मुष्मिꣳश्च चतुर्दशरात्रो भवति सप्त ग्राम्या ओषधयः सप्ताऽऽ*रण्या उभयीषामवरुद्ध्यै यत् पराचीनानि पृष्ठानि - [ ] 9

**7.3.4.2**

भवन्त्यमुमेव तैर्लोकमभि जयन्ति यत् प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोकमभि जयन्ति त्रयस्त्रि॰्शौ मध्यतः स्तोमौ भवतः साम्राज्यमेव गच्छन्त्यधिराजौ भवतोऽधिराजा एव समानानां भवन्त्यतिरात्रावभितो भवतः परिगृहीत्यै । **10**

*(पृष्ठानि - चतुस्त्रि॰्शच्च) (A4)*

**7.3.5.1**

प्रजापतिः सुवर्गं ँलोकमैत् तं देवा अन्वायन् तानादित्याश्च पशवश्चान्वायन् ते देवा अब्रुवन् यान् पशूनुपाजीविष्म त इमे ऽन्वाग्मन्निति तेभ्य एतं चतुर्दशरात्रं प्रत्यौहन् त आदित्याः पृष्ठैः सुवर्गं ँलोकमाऽरोहन् त्र्यहाभ्यामस्मिन् ँलोके पशून् प्रत्यौहन् पृष्ठैरादित्या अमुष्मिन् ँलोक आर्ध्नुवन् त्र्यहाभ्यामस्मिन् - [ ] **11**

**7.3.5.2**

ँलोके पशवो य एवं ँविद्वा॰्स-श्चतुर्दशरात्रमासत उभयोरेव लोकयोर् ऋध्नुवन्त्यस्मि॰श्चामुष्मि॰श्च पृष्ठैरेवाऽमुष्मिन् ँलोक ऋध्नुवन्ति त्र्यहाभ्यामस्मिन् ँलोके ज्योतिर्गौरायुरिति त्र्यहो

भवतीयं ँवाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवध७ स्यान्मध्ये पृष्ठानि भवन्ति सविवधत्वायौ - [ ] 12

**7.3.5.3**

-जो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते बृहद्-रथन्तराभ्यां ँयन्तीयं ँवाव रथन्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं ँलोकं ँयन्ति पराञ्चो वा एते सुवर्गं ँलोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ् त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या ( ) उभयोर्लोकयोर् ऋद्ध्वोत् तिष्ठन्ति चतुर्दशैतास्तासां ँया दश दशाक्षरा विराडन्नं ँविराड् विराजैवान्नाद्यमव रुन्धते याश्चतस्रश्चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठन्त्यतिरात्रावभितो भवतः परिगृहीत्यै । 13

*(आर्ध्नुवन् त्र्यहाभ्यामस्मिन्थ् - सविवधत्वाय - प्रतिष्ठत्या - एकत्रिꣳशच्च) (A5)*

**7.3.6.1**

इन्द्रो वै सदृङ् देवताभिरासीथ् स न व्यावृतमगच्छथ् स
प्रजापतिमुपाधावत् तस्मा एतं पञ्चदशरात्रं प्रायच्छत् तमाऽहरत्
तेनायजत ततो वै सोऽन्याभि-र्देवताभि-र्व्यावृतमगच्छद्य एवं
ँविद्वा०ँसः पञ्चदशरात्रमासते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छन्ति
ज्योतिर्गौरायुरिति त्र्यहो भवतीयं ँवाव ज्योतिरन्तरिक्षं - [ ] **14**

**7.3.6.2**

गौरसावायुरेष्वेव लोकेषु प्रति तिष्ठन्त्यसत्रं ँवा एतद्-यदछन्दोमं
ँयच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते
पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवः छन्दोमा ओजस्येव वीर्ये
पशुषु प्रति तिष्ठन्ति पञ्चदशरात्रो भवति पञ्चदशो वज्रो वज्रमेव
भ्रातृव्येभ्यः प्र हरन्त्यतिरात्राववभितो भवत इन्द्रियस्य ( )
परिगृहीत्यै । **15** *(अन्तरिक्ष - मिन्द्रियस्यै - कञ्च) (A6)*

**7.3.7.1**

इन्द्रो वै शिथिल इवाऽप्रतिष्ठित आसीथ् सोऽसुरेभ्योऽबिभेथ् स
प्रजापतिमुपाऽधावत् तस्मा एतं पञ्चदशरात्रं ँवज्रं प्रायच्छत्

तेनासुरान् पराभाव्य विजित्य श्रियमगच्छदग्निष्टुता पाप्मानं निरदहत पञ्चदशरात्रेणौजो बलमिन्द्रियं ँवीर्यमात्मन्नधत्त य एवं ँविद्वा॒ꣳसः पञ्चदशरात्रमासते भ्रातृव्यानेव पराभाव्य विजित्य श्रियं गच्छन्त्यग्निष्टुता पाप्मानं नि - [ ] 16

**7.3.7.2**

र्दहन्ते पञ्चदशरात्रेणौजो बलमिन्द्रियं ँवीर्यमात्मन् दधत एता एव पशव्याः पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः सँवथ्सर आप्यते सँवथ्सरं पशवोऽनु प्र जायन्ते तस्मात् पशव्या एता एव सुवर्ग्याः पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः सँवथ्सर आप्यते सँवथ्सरः सुवर्गो लोकस्तस्माथ् सुवर्ग्या ज्योतिर्गौरायुरिति त्र्यहो भवतीयं ँवाव ज्योतिरन्तरिक्षं - [ ] 17

**7.3.7.3**

गौरसावायुरिमानेव लोकानभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवध७ स्यान्मद्ध्ये पृष्ठानि भवन्ति सविवधत्वायौजो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते बृहद्-रथन्तराभ्यां ँयन्तीयं ँवाव रथन्तरमसौ

बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं - [ ] 18

**7.3.7.4**

यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ् त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर् ऋद्ध्वोत् तिष्ठन्ति पञ्चदशैतास्तासां या दश दशाक्षरा विराडन्नं विराड् विराजैवान्नाद्यमव रुन्धते याः पञ्च पञ्च दिशो दिक्ष्वेव प्रति तिष्ठन्त्यतिरात्रावभितो भवत इन्द्रियस्य वीर्यस्य प्रजायै ( ) पशूनां परिगृहीत्यै । 19 *(गच्छन्त्यग्निष्टुता पाप्मानं नि - रन्तरिक्षं - लोकं - प्रजायै - द्वे च) (A7)*

**7.3.8.1**

प्रजापति-रकामयतान्नादः स्यामिति स एत७ं सप्तदशरात्र-मपश्यत् तमाऽहरत् तेनायजत ततो वै सोऽन्नादोऽभवद्य एवं विद्वा७ंसः सप्तदश-रात्रमासते ऽन्नादा एव भवन्ति पञ्चाहो भवति पञ्च वा

ऋतवः सँवथ्सर ऋतुष्वेव सँवथ्सरे प्रति तिष्ठन्त्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाऽव रुन्धते ऽसत्रं ँवा एत– [ ] **20**

**7.3.8.2**

–द्यदछन्दोमं ँयच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवः छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति सप्तदशरात्रो भवति सप्तदशः प्रजापतिः प्रजापतेराप्त्या अतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै । **21**

*(एतथ् – सप्तत्रिꣳशच्च) (A8)*

**7.3.9.1**

सा विराड् विक्रम्यातिष्ठद्–ब्रह्मणा देवेष्वन्नेना–सुरेषु ते देवा अकामयन्तोभयꣳ सं ँवृञ्जीमहि ब्रह्म चान्नं चेति त एता विꣳशतिꣳ रात्रीरपश्यन् ततो वै त उभयꣳ समवृञ्जत ब्रह्म चान्नं च ब्रह्मवर्चसिनोऽन्नादा अभवन् य एवं ँविद्वाꣳस एता आसत उभयमेव सँ वृञ्जते ब्रह्म चान्नं च – [ ] **22**

**7.3.9.2**

ब्रह्मवर्चसिनोऽन्नादा भवन्ति द्वे वा एते विराजौ तयोरेव नाना प्रति

तिष्ठन्ति वि॒ꣳशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पद्या यावानेव

पुरुषस्तमाप्त्वोत् तिष्ठन्ति ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं ँवाव

ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोका-नभ्यारोहन्त्यभिपूर्वं

त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं - [ ] **23**

**7.3.9.3**

ँलोकमभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवधꣳ स्यान्मध्ये

पृष्ठानि भवन्ति सविवधत्वायौजो वै वीर्यं पृष्ठान्योज एव वीर्यं

मध्यतो दधते बृहद्-रथन्तराभ्यां ँयन्तीयं ँवाव रथन्तरमसौ

बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै

यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं ँलोकं ँयन्ति पराञ्चो वा

एते सुवर्गं ( ) ँलोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति

प्रत्यङ् त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयार्

ऋद्ध्वोत् तिष्ठन्त्यतिरात्रावभितो भवतो ब्रह्मवर्चस-स्यान्नाद्यस्य

परिगृहीत्यै । **24** *(वृञ्जते ब्रह्म चां नं च – सुवर्ग – मेते सुवर्ग – त्रयोविꣳशतिश्च) (A9)*

**7.3.10.1**

असावादित्योऽस्मिन् ँल्लोक आसीत् तं देवाः पृष्ठैः परिगृह्य सुवर्गं ँल्लोकमगमयन् परैरवस्तात् पर्यगृह्णन् दिवाकीर्त्येन सुवर्गे लोके प्रत्यस्थापयन् परैः परस्तात् पर्यगृह्णन् पृष्ठैरुपावारोहन्थ्स वा असावादित्योऽमुष्मिन् ँल्लोके परैरुभयतः परिगृहीतो यत् पृष्ठानि भवन्ति सुवर्गमेव तैर्लोकं ँयजमाना यन्ति परैरवस्तात् परि गृह्णन्ति दिवाकीर्त्येन – [ ] **25**

**7.3.10.2**

सुवर्गे लोके प्रति तिष्ठन्ति परैः परस्तात् परि गृह्णन्ति पृष्ठैरुपावरोहन्ति यत् परे परस्तान्न स्युः पराञ्चः सुवर्गा-ल्लोकान्निष्पद्येरन् यदवस्तान्न स्युः प्रजा निर्दहेयुरभितो दिवाकीर्त्यं परःसामानो भवन्ति सुवर्ग एवैनां ँल्लोक उभयतः परि गृह्णन्ति यजमाना वै दिवाकीर्त्यꣳ

सँवथ्सरः परःसामानोऽभितो दिवाकीर्त्यं परःसामानो भवन्ति
सँवथ्सर एवोभयतः - [ ] 26

**7.3.10.3**

प्रति तिष्ठन्ति पृष्ठं ँवै दिवाकीर्त्यं पार्श्वे परःसामानो ऽभितो
दिवाकीर्त्यं परःसामानो भवन्ति तस्मादभितः पृष्ठं पार्श्वे
भूयिष्ठा ग्रहा गृह्यन्ते भूयिष्ठ७ँ शस्यते यज्ञस्यैव तन्मध्यतो
ग्रन्थिं ग्रथ्नन्त्यविस्र७ँसाय सप्त गृह्यन्ते सप्त वै शीर्.षण्याः
प्राणाः प्राणानेव यजमानेषु दधति यत् पराचीनानि पृष्ठानि
भवन्त्यमुमेव तै-र्लोकमभ्यारोहन्ति यदिमं ँलोकं न - [ ] 27

**7.3.10.4**

प्रत्यव-रोहेयुरुद्वा माद्येयुर्यजमानाः प्र वा मीयेरन् यत् प्रतीचीनानि
पृष्ठानि भवन्तीममेव तैर्लोकं प्रत्यवरोहन्त्यथो अस्मिन्नेव लोके प्रति
तिष्ठन्त्यनुन्मादायेन्द्रो वा अप्रतिष्ठित आसीथ् स प्रजापति-मुपाधावत्
तस्मा एतमेकवि७ँशतिरात्रं प्रायच्छत् तमाऽहरत् तेनायजत ततो वै स
प्रत्यतिष्ठद्ये बहुयाजिनो ऽप्रतिष्ठिताः - [ ] 28

**7.3.10.5**

स्युस्त एकवि॒ꣳशति-रात्रमासीरन् द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकवि॒ꣳश एतावन्तो वै देवलोकास्तेष्वेव यथा पूर्वं प्रति तिष्ठन्त्यसावादित्यो न व्यरोचत स प्रजापतिमुपाधावत् तस्मा एतमेकवि॒ꣳशतिरात्रं प्रायच्छत् तमाऽहरत् तेनायजत ततो वै सो ऽरोचत य एवं विद्वा॒ꣳस एकवि॒ꣳशतिरात्रमासते ( ) रोचन्त एवैकवि॒ꣳशतिरात्रो भवति रुग्वा एकवि॒ꣳशो रुचमेव गच्छन्त्यथो प्रतिष्ठामेव प्रतिष्ठा ह्येकवि॒ꣳशो ऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै । **29**

*(गृह्णन्ति दिवाकीर्त्येनै - वोभयतो - ना - प्रतिष्ठिता - आसत - एकवि॒ꣳशतिश्च) (A10)*

**7.3.11.1**

अर्वाङ् यज्ञः सं क्रामत्वमुष्मादधि मामभि । ऋषीणां ँयः पुरोहितः । निर्देवं निर्वीरं कृत्वा विष्कन्धं तस्मिन् हीयतां ँयोऽस्मान् द्वेष्टि । शरीरं ँयज्ञशमलं कुसीदं तस्मिन्त्सीदतु योऽस्मान् द्वेष्टि ।

यज्ञ यज्ञस्य यत् तेजस्तेन संक्राम मामभि ।
ब्राह्मणानृत्विजो देवान् यज्ञस्य तपसा ते सवाहमा हुवे ।
इष्टेन पक्वमुप - [ ] 30

**7.3.11.2**

ते हुवे सवाहं । सं ते वृञ्जे सुकृत॑ सं प्रजां पशून् ।
प्रैषान्थ्-सामिधेनी-राघारावाज्यभागावा-श्रुतं प्रत्याश्रुतमा शृणामि ते ।
प्रयाजानूयाजान्थ्-स्विष्टकृत-मिडामाशिष आ वृञ्जे सुवः ।
अग्निनेन्द्रेण सोमेन सरस्वत्या विष्णुना देवताभिः ।
याज्यानुवाक्याभ्यामुप ते हुवे सवाहं यँज्ञमा ददे ते वषट्कृतं ।
स्तुत॑ शस्त्रं प्रतिगरं ग्रहमिडामाशिष - [ ] 31

**7.3.11.3**

आ वृञ्जे सुवः । पत्नीसँयाजानुप ते हुवे सवाह॑ समिष्टयजुरा
ददे तव । पशून्थ्-सुतं पुरोडाशान्थ्-सवनान्योत यज्ञं ।
देवान्थ्-सेन्द्रानुप ते हुवे सवाह-मग्निमुखान्थ्-सोमवतो ये च
विश्वे । 32 *(उप - ग्रहमिडामाशिषो - द्वात्रि॑शच्च) (A11)*

**7.3.12.1**

भूतं भव्यं भविष्यद्वषट्थ् स्वाहा नम ऋख् साम यजुर्वषट्थ् स्वाहा नमो गायत्री त्रिष्टुब् जगती वषट्थ् स्वाहा नमः पृथिव्यन्तरिक्षं द्यौ र्वषट्थ् स्वाहा नमो ऽग्निर्वायुः सूर्यो वषट्थ् स्वाहा नमः प्राणो-व्यानो-ऽपानो वषट्थ् स्वाहा नमो ऽन्नं कृषि-र्वृष्टि-र्वषट्थ् स्वाहा नमः पितापुत्रः पौत्रो वषट्थ् स्वाहा नमो भूर्भुवः ( ) सुव र्वषट्थ् स्वाहा नमः । **33** *(भुव - श्चत्वारि च) (A12)*

**7.3.13.1**

आ मे गृहा भवन्त्वा प्रजा म आ मा यज्ञो विशतु वीर्यावान् ।
आपो देवीर्यज्ञिया माऽऽविशन्तु सहस्रस्य मा भूमा मा प्र हासीत् ।
आ मे ग्रहो भवत्वा पुरोरुख् स्तुतशस्त्रे माऽऽ विशता॑ समीची ।
आदित्या रुद्रा वसवो मे सदस्याः सहस्रस्य मा भूमा मा प्र हासीत् ।
आ माऽग्निष्टोमो विशतू ( ) क्थ्यश्चातिरात्रो माऽऽ विशत्वापिशर्वरः ।
तिरो अह्निया मा सुहुता आ विशन्तु सहस्रस्य मा भूमा मा प्र हासीत् । **34** *(अग्निष्टोमो विशत्व - ष्टादश च) (A13)*

**7.3.14.1**

अग्निना तपोऽन्वभवद्-वाचा ब्रह्म मणिना रूपाणीन्द्रेण देवान् वातेन प्राणान्थ् सूर्येण द्यां चन्द्रमसा नक्षत्राणि यमेन पितॄन् राज्ञा मनुष्यान् फलेन नादेयानजगरेण सर्पान् व्याघ्रेणाऽऽ*रण्यान् पशूञ्छ्येनेन पतत्रिणो वृष्णाऽश्वानृषभेण गा बस्तेनाजा वृष्णिनाऽवीर्व्रीहिणाऽन्नानि यवेनौषधीर्न्यग्रोधेन वनस्पतीनुदुंबरेणोर्जं गायत्रिया छन्दाꣳसि त्रिवृता स्तोमान् ब्राह्मणेन ( ) वाचं । 35

*(ब्राह्मणेनै - कं च) (A14)*

**7.3.15.1**

स्वाहाऽऽधिमाधीताय स्वाहा स्वाहाऽऽधीतं मनसे स्वाहा स्वाहा मनः प्रजापतये स्वाहा काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहा ऽदित्यै स्वाहा ऽदित्यै मह्यै स्वाहाऽदित्यै सुमृडीकायै स्वाहा सरस्वत्यै स्वाहा सरस्वत्यै बृहत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरन्धिषाय स्वाहा त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा ( ) विष्णवे स्वाहा

विष्णवे निखुर्यपाय स्वाहा विष्णवे निभूयपाय स्वाहा सर्वस्मै स्वाहा ।

36 *(पुरुरूपाय स्वाहा - दश च) (A15)*

**7.3.16.1**

दद्भ्यः स्वाहा हनूभ्याꣳ स्वाहोष्ठाभ्याꣳ स्वाहा मुखाय स्वाहा नासिकाभ्याꣳ स्वाहा ऽक्षीभ्याꣳ स्वाहा कर्णाभ्याꣳ स्वाहा पार इक्षवोऽवार्येभ्यः पक्ष्मभ्यः स्वाहा ऽवार इक्षवः पार्येभ्यः पक्ष्मभ्यः स्वाहा शीर्.ष्णे स्वाहा भ्रूभ्याꣳ स्वाहा ललाटाय स्वाहा मूर्ध्ने स्वाहा मस्तिष्काय स्वाहा केशेभ्यः स्वाहा वहाय स्वाहा ग्रीवाभ्यः स्वाहा स्कन्धेभ्यः स्वाहा कीकसाभ्यः स्वाहा पृष्टीभ्यः स्वाहा पाजस्याय स्वाहा पार्श्वाभ्याꣳ स्वाहा- [ ] 37

**7.3.16.2**

ऽꣳसाभ्याꣳ स्वाहा दोषभ्याꣳ स्वाहा बाहुभ्याꣳ स्वाहा जङ्घाभ्याꣳ स्वाहा श्रोणीभ्याꣳ स्वाहोरुभ्याꣳ स्वाहा ऽष्ठीवद्भ्याꣳ स्वाहा जङ्घाभ्याꣳ स्वाहा भसदे स्वाहा शिखण्डेभ्यः स्वाहा वालधानाय स्वाहा ऽऽण्डाभ्याꣳ स्वाहा शेपाय स्वाहा रेतसे स्वाहा

प्रजाभ्यः स्वाहा प्रजननाय स्वाहा पद्भ्यः स्वाहा शफेभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा लोहिताय स्वाहा माꣳसाय स्वाहा स्नावभ्यः स्वाहा ऽस्थभ्यः स्वाहा मज्जभ्यः स्वाहा ( ) ऽङ्गेभ्यः स्वाहा ऽऽत्मने स्वाहा सर्वस्मै स्वाहा । 38

*(पार्श्वाभ्याꣳ स्वाहा – मज्जभ्यः स्वाहा – षट् च) (A16)*

**7.3.17.1**

अञ्ज्येताय स्वाहा ऽञ्जिसक्थाय स्वाहा शितिपदे स्वाहा शितिककुदे स्वाहा शितिरन्ध्राय स्वाहा शितिपृष्ठाय स्वाहा शित्यꣳसाय स्वाहा पुष्पकर्णाय स्वाहा शित्योष्ठाय स्वाहा शितिभ्रवे स्वाहा शितिभसदे स्वाहा श्वेतानूकाशाय स्वाहा ऽञ्जये स्वाहा ललामाय स्वाहा ऽसितज्ञवे स्वाहा कृष्णैताय स्वाहा रोहितैताय स्वाहा ऽरुणैताय स्वाहेदृशाय स्वाहा कीदृशाय स्वाहा तादृशाय स्वाहा सदृशाय स्वाहा विसदृशाय स्वाहा सुसदृशाय स्वाहा रूपाय स्वाहा ( ) सर्वस्मै स्वाहा । 39

*(रूपाय स्वाहा – द्वे च ) (A17)*

**7.3.18.1**

कृष्णाय स्वाहा श्वेताय स्वाहा पिशङ्गाय स्वाहा सारङ्गाय स्वाहा ऽरुणाय स्वाहा गौराय स्वाहा बभ्रवे स्वाहा नकुलाय स्वाहा रोहिताय स्वाहा शोणाय स्वाहा श्यावाय स्वाहा श्यामाय स्वाहा पाकलाय स्वाहा सुरूपाय स्वाहा ऽनुरूपाय स्वाहा विरूपाय स्वाहा सरूपाय स्वाहा प्रतिरूपाय स्वाहा शबलाय स्वाहा कमलाय स्वाहा पृश्नये स्वाहा पृश्निसक्थाय स्वाहा सर्वस्मै स्वाहा । **40**

*(कृष्णाय – षट्चत्वारिꣳशत्) (A18)*

**7.3.19.1**

ओषधीभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा काण्डेभ्यः स्वाहा वल्शेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा गृहीतेभ्यः स्वाहा ऽगृहीतेभ्यः स्वाहा ऽवपन्नेभ्यः स्वाहा शयानेभ्यः स्वाहा सर्वस्मै स्वाहा । **41**

*(ओषधीभ्य – श्चतुर्विꣳशतिः) (A19)*

**7.3.20.1**

वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा स्कन्धोभ्यः स्वाहा शाखाभ्यः स्वाहा पर्णेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा गृहीतेभ्यः स्वाहा ऽगृहीतेभ्यः स्वाहा ऽवपन्नेभ्यः स्वाहा शयानेभ्यः स्वाहा शिष्टाय स्वाहा ऽतिशिष्टाय स्वाहा परिशिष्टाय स्वाहा सꣳशिष्टाय स्वाहो –च्छिष्टाय स्वाहा रिक्ताय स्वाहा ऽरिक्ताय स्वाहा प्ररिक्ताय स्वाहा सꣳरिक्ताय स्वाहो –द्रिक्ताय स्वाहा सर्वस्मै स्वाहा । **42** *(वनस्पतिभ्यः – षट् चत्वारिꣳशत्) (A20)*

**Prasna Korvai with starting Padams of 1 to 20 Anuvaakams :-**

(प्रजवं – ब्रह्मवादिनः कि – मेष वा आप्त – आदित्या उभयोः – प्रजापतिरन्वाय –न्निन्द्रो वै सदृङ् – ङिन्द्रो वै शिथिलः – प्रजापतिरकामयता ऽन्नादः – सा विराड – सावादित्यो – ऽर्वाङ् – भूत – मा मे – ऽग्निना –स्वाहाऽऽधिन् – दद्भ्योऽ – ञ्ज्येताय – कृष्णा – यौषधीभ्यो – वनस्पतिभ्यो – विꣳशतिः)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(प्रजवं – प्रजापति – र्यदछन्दोमं – ते हुवे सवाऽह – मोषधीभ्यो – द्विचत्वारिꣳशत्)

**First and Last Padam of Third Prasnam of 7th Kandam**

(प्रजवꣳ – सर्वस्मै स्वाहा)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां सप्तमकाण्डे तृतीयः प्रश्नः समाप्तः ॥

---

ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः

हरिः ओं

## 7.4 सप्तमकाण्डे चतुर्थः प्रश्नः - सत्रकर्मनिरूपणं

**7.4.1.1**

बृहस्पतिरकामयत श्रन्मे देवा दधीरन् गच्छेयं पुरोधामिति स एतं चतुर्वि॒ꣳशतिरात्र-मपश्यत् तमाऽहरत् तेनायजत ततो वै तस्मै श्रद्देवा अदधतागच्छत् पुरोधां ँय एवं ँविद्वा॒ꣳस-श्चतुर्वि॒ꣳशतिरात्रमासते श्रदेभ्यो मनुष्या दधते गच्छन्ति पुरोधां ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं ँवाव ज्योतिरन्तरिक्षं गौरसावायु - [ ] 1

**7.4.1.2**

-रिमानेव लोकानभ्यारोहन्त्यभि पूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं ँलोकमभ्यारोहन्त्यसत्रं ँवा एतद्-यदछन्दोमं ँयच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवः छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति बृहद्-रथन्तराभ्यां ँयन्तीयं ँवाव रथन्तरमसौ बृहदाभ्यामेव - [ ] 2

**7.4.1.3**

यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती
ताभ्यामेव सुवर्गं ँलोकं ँयन्ति चतुर्वि॑ꣳशतिरात्रो भवति
चतुर्वि॑ꣳशतिरर्धमासाः सँवथ्सरः सँवथ्सरः सुवर्गो लोकः
सँवथ्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो चतुर्वि॑ꣳशत्यक्षरा
गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धते
ऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै । **3**

*(असावायु - राभ्यामेव - पञ्चचत्वारि॑ꣳशच्च) (A1)*

**7.4.2.1**

यथा वै मनुष्या एवं देवा अग्र आसन् तेऽकामयन्तावर्तिं पाप्मानं
मृत्युमपहत्य दैवी॑ꣳ स॑ꣳसदं गच्छेमेति त एतं चतुर्वि॑ꣳशतिरात्र-
मपश्यन् तमाऽहरन् तेनायजन्त ततो वै तेऽवर्तिं पाप्मानं मृत्युमपहत्य
दैवी॑ꣳ स॑ꣳसदमगच्छन् य एवं ँविद्वा॑ꣳस-श्चतुर्वि॑ꣳशतिरात्र-
मासतेऽवर्तिमेव पाप्मान-मपहत्य श्रियं गच्छन्ति श्रीर्.हि
मनुष्यस्य - [ ] **4**

7.4.2.2

दैवी स॑ꣳसज्ज्यौतिरतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै
पृष्ठ्यः षडहो भवति षड् वा ऋतवः सँवथ्सरस्तं मासा अर्धमासा
ऋतवः प्रविश्य दैवीꣳ सꣳसदमगच्छन् य एवं ँविद्वाꣳस-
श्चतुर्विꣳशतिरात्रमासते सँवथ्सरमेव प्रविश्य वस्यसीꣳ सꣳसदं
गच्छन्ति त्रयस्त्रयस्त्रिꣳशा अवस्ताद्-भवन्ति त्रयस्त्रयस्त्रिꣳशाः
परस्तात् त्रयस्त्रिꣳशैरेवोभयतो ऽवर्तिं पाप्मानमपहत्य दैवीꣳ सꣳसदं
मध्यतो - [ ] 5

7.4.2.3

गच्छन्ति पृष्ठानि हि दैवी सꣳसज्जामि वा एतत् कुर्वन्ति यत्
त्रयस्त्रयस्त्रिꣳशा अन्वञ्चो मध्येऽनिरुक्तो भवति तेनाजाम्यूर्ध्वानि
पृष्ठानि भवन्त्यूर्ध्वाः छन्दोमा उभाभ्याꣳ रूपाभ्याꣳ सुवर्गं ँलोकं
ँयन्त्यसत्रं ँवा एतद्-यदछन्दोमं ँयच्छन्दोमा भवन्ति तेन सत्रं देवता
एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवः- [ ] 6

**7.4.2.4**

छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति त्रयस्त्रयस्त्रि॒ꣳशा
अवस्ताद्-भवन्ति त्रयस्त्रयस्त्रि॒ꣳशाः परस्तान्मध्ये पृष्ठान्युरो वै
त्रयस्त्रि॒ꣳशा आत्मा पृष्ठान्यात्मन एव तद्-यजमानाः शर्म
नह्यन्तेऽनार्त्यै बृहद्-रथन्तराभ्याँ यन्तीयं वाव रथन्तरमसौ
बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै
यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव - [ ] 7

**7.4.2.5**

सुवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति
ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ् षडहो भवति प्रत्यवरूढ्या अथो
प्रतिष्ठित्या उभयोर्लोकयोर् ऋद्ध्वोत् तिष्ठन्ति त्रिवृतोऽधि त्रिवृतमुप
यन्ति स्तोमाना॒ꣳ संपत्त्यै प्रभवाय ज्योतिरग्निष्टोमो भवत्ययं वाव स
क्षयोऽस्मादेव तेन क्षयान्न यन्ति चतुर्वि॒ꣳशतिरात्रो भवति
चतुर्वि॒ꣳशतिरर्धमासाः संवथ्सरः ( ) संवथ्सरः सुवर्गो लोकः
संवथ्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो चतुर्वि॒ꣳशत्यक्षरा गायत्री

गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धतेऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै । 8

*(मनुष्यस्य - मध्यतः - पशव - स्ताभ्यामेव - सँवथ्सर - श्चतुर्विꣳशतिश्च) (A2)*

**7.4.3.1**

ऋक्षा वा इयमलोमकाऽऽसीथ् साऽकामयतौषधीभि-र्वनस्पतिभिः प्र जायेयेति सैतास्त्रिꣳशतꣳ रात्रीरपश्यत् ततो वा इयमोषधीभि-र्वनस्पतिभिः प्राजायत ये प्रजाकामाः पशुकामाः स्युस्त एता आसीरन् प्रैव जायन्ते प्रजया पशुभिरियं ँवा अक्षुध्यथ् सैतां ँविराजमपश्यत् तामात्मन् धित्वाऽन्नाद्यमवा रुन्धौषधी - [ ] 9

**7.4.3.2**

-र्वनस्पतीन् प्रजां पशून् तेनावर्धत सा जेमानं महिमान-मगच्छद्य एवं ँविद्वाꣳस एता आसते विराजमेवाऽऽ*त्मन् धित्वाऽन्नाद्यमव रुन्धते वर्धन्ते प्रजया पशुभिर्जेमानं महिमानं गच्छन्ति ज्योतिरतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै पृष्ठ्यः षडहो भवति षड् वा

ऋतवः षट् पृष्ठानि पृष्ठैरेवर्तूनन्वा-रोहन्त्यृतुभिः सँवथ्सरं ते सँवथ्सर एव - [ ] **10**

**7.4.3.3**

प्रति तिष्ठन्ति त्रयस्त्रि॒ꣳशात् त्रयस्त्रि॒ꣳशमुप यन्ति यज्ञस्य संतत्या अथो प्रजापतिर्वै त्रयस्त्रि॒ꣳशः प्रजापतिमेवाऽऽ*रभन्ते प्रतिष्ठित्यै त्रिणवो भवति विजित्या एकवि॒ꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽ*त्मन् दधते त्रिवृदग्निष्टुद्-भवति पाप्मानमेव तेन निर्दहन्तेऽथो तेजो वै त्रिवृत् तेज एवाऽऽत्मन् दधते पञ्चदश इन्द्रस्तोमो भवतीन्द्रियमेवाव - [ ] **11**

**7.4.3.4**

रुन्धते सप्तदशो भवत्यन्नाद्यस्या वरुद्ध्या अथो प्रैव तेन जायन्त एकवि॒ꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽ*त्मन् दधते चतुर्वि॒ꣳशो भवति चतुर्वि॒ꣳशतिरर्धमासाः सँवथ्सरः सँवथ्सरः सुवर्गो लोकः सँवथ्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो एष वै

विषूवान् विषूवन्तो भवन्ति य एवं ँविद्वा७ंस एता आसते
चतुर्वि७ंशात् पृष्ठान्युप यन्ति सँवथ्सर एव प्रतिष्ठाय – [ ] 12

**7.4.3.5**

देवता अभ्यारोहन्ति त्रयस्त्रि७ंशात् त्रयस्त्रि७ंशमुप यन्ति त्रयस्त्रि७ंशद्वै
देवता देवतास्वेव प्रति तिष्ठन्ति त्रिणवो भवतीमे वै लोकास्त्रिणव
एष्वेव लोकेषु प्रति तिष्ठन्ति द्वावेकवि७ंशौ भवतः प्रतिष्ठित्या अथो
रुचमेवाऽऽ*त्मन् दधते बहवः षोडशिनो भवन्ति तस्माद्–बहवः
प्रजासु वृषाणो यदेते स्तोमा व्यतिषक्ता भवन्ति तस्मादिय –
मोषधीभि–र्वनस्पतिभि–र्व्यतिषक्ता – [ ] 13

**7.4.3.6**

व्यतिषज्यन्ते प्रजया पशुभिर्य एवं ँविद्वा७ंस एता आसते ऽक्लृप्ता
वा एते सुवर्गं ँलोकं ँयन्त्युच्चावचान् हि स्तोमानुपयन्ति यदेत
ऊद्ध्र्वाः क्लृप्ताः स्तोमा भवन्ति क्लृप्ता एव सुवर्गं ँलोकं
ँयन्त्युभयोरेभ्यो लोकयोः कल्पते त्रि७ंशदेतास्त्रि७ंशदक्षरा विराडन्नं
विराड् विराजैवान्नाद्यमव रुन्धते ऽतिरात्रावभितो भवतो ऽन्नाद्यस्य

परिगृहीत्यै । **14** *(ओषधीः - सँवँथ्सर एवा - ऽव - प्रतिष्ठाय - व्यतिषक्त्यै - कान्न पञ्चाशच्च) (A3)*

**7.4.4.1**

प्रजापतिः सुवर्गं ँलोकमैत् तं देवा येनयेन छन्दसाऽनु प्रायुञ्जत तेन नाऽऽ*प्नुवन् त एता द्वात्रि॒ँ॒शत॒ँ॒ रात्रीरपश्यन् द्वात्रि॒ँ॒शदक्षरा ऽनुष्टुगा-नुष्टुभः प्रजापतिः स्वेनैव छन्दसा प्रजापति-माप्त्वा ऽभ्यारुह्य सुवर्गं ँलोकमायन् य एवं ँविद्वा॒ँ॒स एता आसते द्वात्रि॒ँ॒शदेता द्वात्रि॒ँ॒शदक्षरा ऽनुष्टुगा-नुष्टुभः प्रजापतिः स्वेनैव छन्दसा प्रजापतिमाप्त्वा श्रियं गच्छन्ति - [ ] **15**

**7.4.4.2**

श्रीर्.हि मनुष्यस्य सुवर्गो लोको द्वात्रि॒ँ॒शदेता द्वात्रि॒ँ॒शदक्षरा-ऽनुष्टुग्-वागनुष्टुफ् सर्वामेव वाचमाप्नुवन्ति सर्वे वाचो वदितारो भवन्ति सर्वे हि श्रियं गच्छन्ति ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं ँवाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्त्यभिपूर्वं

त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं ँलोकमभ्यारोहन्ति बृहद्-रथन्तराभ्यां
ँयन्ती - [ ] 16

**7.4.4.3**

-यं ँवाव रथन्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति
तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं ँलोकं ँयन्ति
पराञ्चो वा एते सुवर्गं ँलोकमभ्यारोहन्ति ये पराचस्त्र्यहानुपयन्ति
प्रत्यङ् त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्
ऋद्ध्वोत् तिष्ठन्ति द्वात्रि॒ꣳशदेतास्तासां ँया स्त्रि॒ꣳशत् त्रि॒ꣳशदक्षरा ( )
विराडन्नं ँविराड् विराजैवाऽन्नाद्यमव रुन्धते ये द्वे अहोरात्रे एव ते
उभाभ्या॒ꣳ रूपाभ्या॒ꣳ सुवर्गं ँलोकं ँयन्त्यतिरात्रावभितो भवतः
परिगृहीत्यै । 17

*(गच्छन्ति - यन्ति - त्रि॒ꣳशदक्षरा - द्वावि॒ꣳशतिश्च) (A4)*

**7.4.5.1**

द्वे वाव देवसत्रे द्वादशाहश्चैव त्रयस्त्रि॒ꣳशदहश्च य एवं
ँविद्वा॒ꣳसस्त्रयस्त्रि॒ꣳशदहमासते साक्षादेव देवता अभ्यारोहन्ति

यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति यद्यवविध्यति पापीयान् भवति यदि नावविध्यति सदृङ् य एवं ँविद्वा॒ꣳसस्त्रयस्त्रिꣳ-शदहमासते वि पाप्मना भ्रातृव्येणाऽऽ* वर्तन्ते ऽहर्भाजो वा एता देवा अग्र आऽहर - [ ] 18

**7.4.5.2**

-न्नहरेको ऽभजता-हरेकस्ताभिर्वैते प्रबाहुगार्ध्नुवन् य एवं ँविद्वाꣳसस्त्रयस्त्रिꣳशदहमासते सर्व एव प्रबाहुगृध्नुवन्ति सर्वे ग्रामणीयं प्राप्नुवन्ति पञ्चाहा भवन्ति पञ्च वा ऋतवः सँवथ्सर ऋतुष्वेव सँवथ्सरे प्रति तिष्ठन्त्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धते त्रीण्याश्विनानि भवन्ति त्रय इमे लोका ए- [ ] 19

**7.4.5.3**

-ष्वेव लोकेषु प्रति तिष्ठन्त्यथो त्रीणि वै यज्ञस्येन्द्रियाणि तान्येवाव रुन्धते विश्वजिद्-भवत्यन्नाद्यस्या वरुध्यै सर्वपृष्ठो भवति सर्वस्याभिजित्यै वाग्वै द्वादशाहो यत् पुरस्ताद् द्वादशाह-मुपेयुरनाप्तां ँवाच-मुपेयु-रुपदासुकैषां ँवाख् स्या-दुपरिष्टाद् द्वादशाहमुप

यन्त्याप्तामेव वाचमुप यन्ति तस्मा-दुपरिष्टाद्-वाचा वदामो

ऽवान्तरं - [ ] 20

**7.4.5.4**

ँवै दशरात्रेण प्रजापतिः प्रजा असृजत यद्-दशरात्रो भवति प्रजा एव तद् यजमानाः सृजन्त एता॒ ह वा उदङ्कः शौल्बायनः सत्रस्यर्धिमुवाच यद् दशरात्रो यद् दशरात्रो भवति सत्रस्यर्ध्या अथो यदेव पूर्वेष्वहः सु विलोम क्रियते तस्यैवैषा शान्तिर्द्व्यनीका वा एता रात्रयो यजमाना विश्वजिथ् सहातिरात्रेण पूर्वाः षोडश सहा ( ) तिरात्रेणोत्तराः षोडश य एवं ँविद्वा॒ँसस्त्रयस्त्रि॒ँशदहमासत ऐषां द्व्यनीका प्रजा जायते ऽतिरात्रावभितो भवतः परिगृहीत्यै । 21

*(अहर- त्रेष्व - वान्तर॒ - षोडश सह - सप्तदश च) (A5)*

**7.4.6.1**

आदित्या अकामयन्त सुवर्गं ँलोकमियामेति ते सुवर्गं ँलोकं न प्राजानन्न सुवर्गं ँलोकमायन् त एत॒ षट्त्रि॒ँशद्रात्र-मपश्यन् तमाऽहरन् तेनायजन्त ततो वै ते सुवर्गं ँलोकं प्राजानन्थ् सुवर्गं

ँल्लोकमायन् य एवं ँविद्वा॑ꣳसः षट्त्रिꣳशद् रात्रमासते सुवर्गमेव
लोकं प्र जानन्ति सुवर्गं ँल्लोकं ँयन्ति ज्योतिरतिरात्रो – [ ] **22**

**7.4.6.2**

भवति ज्योतिरेव पुरस्ताद् दधते सुवर्गस्य लोकस्यानुख्यात्यै षडहा
भवन्ति षड् वा ऋतव ऋतुष्वेव प्रति तिष्ठन्ति चत्वारो भवन्ति चतस्रो
दिशो दिक्ष्वेव प्रति तिष्ठन्त्यसत्रं ँवा एतद्–यदछन्दोमं ँयच्छन्दोमा
भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं
पृष्ठानि पशवः छन्दोमा ओजस्येव – [ ] **23**

**7.4.6.3**

वीर्ये पशुषु प्रति तिष्ठन्ति षट्–त्रिꣳशद् रात्रो भवति षट्त्रिꣳशदक्षरा
बृहती बार्.हताः पशवो बृहत्यैव पशूनव रुन्धते बृहती छन्दसाꣳ
स्वाराज्यमाश्नुता–श्नुवते स्वाराज्यं ँय एवं ँविद्वाꣳसः षट्त्रिꣳशद्
रात्रमासते सुवर्गमेव लोकं ँयन्त्यतिरात्रावभितो भवतः सुवर्गस्य
लोकस्य परिगृहीत्यै । **24**

*(अतिरात्र – ओजस्येव – षट्त्रिꣳशच्च) (A6)*

**7.4.7.1**

वसिष्ठो हतपुत्रोऽकामयत विन्देय प्रजामभि सौदासान् भवेयमिति

स एतमेकस्मा-न्नपञ्चाश-मपश्यत् तमाऽहरत् तेनायजत ततो वै

सोऽविन्दत प्रजामभि सौदासानभवद्य एवं ँविद्वा॒ꣳस एकस्मा -

न्नपञ्चाशमासते विन्दन्ते प्रजामभि भ्रातृव्यान् भवन्ति

त्रयस्त्रिवृतोऽग्निष्टोमा भवन्ति वज्रस्यैव मुखꣳ सꣳ श्यन्ति

दश पञ्चदशा भवन्ति पञ्चदशो वज्रो - [ ] 25

**7.4.7.2**

वज्रमेव भ्रातृव्येभ्यः प्र हरन्ति षोडशिमद्-दशममह-र्भवति

वज्र एव वीर्यं दधति द्वादश सप्तदशा भवन्त्यन्नाद्यस्या वरुद्ध्या

अथो प्रैव तैर्जायन्ते पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट् पृष्ठानि

पृष्ठैरेवर्तूनन्वारोहन्त्यृतृभिः सँवथ्सरं ते सँवथ्सर एव प्रति तिष्ठन्ति

द्वादशैकविꣳशा भवन्ति प्रतिष्ठित्या अथो रुचमेवाऽऽ*त्मन्- [ ] 26

**7.4.7.3**

दधते बहवः षोडशिनो भवन्ति विजित्यै षडाश्विनानि भवन्ति षड्वा

ऋतव ऋतुष्वेव प्रति तिष्ठन्त्यूनातिरिक्ता वा एता रात्रय ऊनास्तद्-

यदेकस्यै न पञ्चाशद-तिरिक्तास्तद्-यद्-भूयसी-रष्टाचत्वारि॑ँशत
ऊनाच्च खलु वा अतिरिक्ताच्च प्रजापतिः प्राजायत ये प्रजाकामाः
पशुकामाः स्युस्त एता आसीरन् प्रैव जायन्ते प्रजया ( )
पशुभिर्वैराजो वा एष यज्ञो यदेकस्मा-न्नपञ्चाशो य एवं ँविद्वा॑ँस
एकस्मा-न्नपञ्चाशमासते विराजमेव गच्छन्त्यन्नादा भवन्त्यति-
रात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै । **27**

*(वज्र - आत्मन् - प्रजया - द्वावि॑ँशतिश्च) (A7)*

**7.4.8.1**

स॒ँवथ्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्नेषा वै स॒ँवथ्सरस्य
पत्नी यदेकाष्टकैतस्यां ँवा एष एता॑ँ रात्रिं ँवसति साक्षादेव
स॒ँवथ्सरमारभ्य दीक्षन्त आर्तं ँवा एते स॒ँवथ्सरस्याभि दीक्षन्ते
य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतो व्यस्तं ँवा एते
स॒ँवथ्सरस्याऽभि दीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू
भवतः फल्गुनी पूर्णमासे दीक्षेरन् मुखं ँवा एतथ् - [ ] **28**

**7.4.8.2**

सँवथ्सरस्य यत् फल्गुनी पूर्णमासो मुखत एव सँवथ्सरमारभ्य

दीक्षन्ते तस्यैकैव निर्या यथ् साम्मेघ्ये विषूवान्थ् संपद्यते

चित्रापूर्णमासे दीक्षेरन् मुखं ँवा एतथ् सँवथ्सरस्य यच्चित्रापूर्णमासो

मुखत एव सँवथ्सरमारभ्य दीक्षन्ते तस्य न का चन निर्या भवति

चतुरहे पुरस्तात् पौर्णमास्यै दीक्षेरन् तेषामेकाष्टकायां क्रयः सं पद्यते

तेनैकाष्टकां न छम्बट् कुर्वन्ति तेषां – [ ] 29

**7.4.8.3**

पूर्वपक्षे सुत्या सं पद्यते पूर्वपक्षं मासा अभि सं पद्यन्ते ते पूर्वपक्ष

उत् तिष्ठन्ति तानुत्तिष्ठत ओषधयो वनस्पतयोऽनूत् तिष्ठन्ति तान्

कल्याणी कीर्तिरनूत् तिष्ठत्यराथ् सुरिमे यजमाना इति तदनु सर्वे

राध्नुवन्ति । 30

*(एत – च्छंबट्कुर्वन्ति तेषां – चतुस्त्रिँशच्च) (A8)*

**7.4.9.1**

सुवर्गं ँवा एते लोकं ँयन्ति ये सत्रमुपयन्त्यभीन्धत एव

दीक्षाभिरात्मानँ श्रपयन्त उपसद्भि–र्द्वाभ्यां ँलोमाव द्यन्ति

द्वाभ्यां त्वचं द्वाभ्यामसृद् द्वाभ्यां मा॒ꣳसं द्वाभ्यामस्थि द्वाभ्यां मज्जानमात्मदक्षिणं ँवै सत्रमात्मानमेव दक्षिणां नीत्वा सुवर्गं ँलोकं ँयन्ति शिखामनु प्र वपन्त ऋद्ध्या अथो रघीयाꣳसः सुवर्गं ँलोकमयामेति । **31**

*(सुवर्गं - पञ्चाशत्) (A9)*

**7.4.10.1**

ब्रह्मवादिनो वदन्त्यतिरात्रः परमो यज्ञक्रतूनां कस्मात् तं प्रथममुप यन्तीत्येतद्वा अग्निष्टोमं प्रथममुप यन्त्यथोक्थ्यमथ षोडशिन - मथातिरात्र-मनुपूर्वमेवैतद्-यज्ञक्रतूनुपेत्य तानालभ्य परिगृह्य सोममेवैतत् पिबन्त आसते ज्योतिष्टोमं प्रथममुप यन्ति ज्योतिष्टोमो वै स्तोमानां मुखं मुखत एव स्तोमान् प्र युञ्जते ते - [ ] **32**

**7.4.10.2**

सꣴस्तुता विराजमभि सं पद्यन्ते द्वे चर्चावति रिच्येते एकया गौरतिरिक्त एकयाऽऽयुरूनः सुवर्गो वै लोको ज्योतिरूर्ग्-विराट्-थ्सुवर्गमेव तेन लोकं ँयन्ति रथन्तरं दिवा भवति रथन्तरं

नक्तमित्याहु-र्ब्रह्मवादिनः केन तदजामीति सौभरं तृतीयसवने
ब्रह्मसामं बृहत् तन्मध्यतो दधति विधृत्यै तेनाजामि । 33
*(त - एकान्न पञ्चाशच्च) (A10)*

**7.4.11.1**

ज्योतिष्टोमं प्रथममुप यन्त्यस्मिन्नेव तेन लोके प्रति तिष्ठन्ति गोष्टोमं
द्वितीयमुप यन्त्यन्तरिक्ष एव तेन प्रति तिष्ठन्त्यायुष्टोमं तृतीयमुप
यन्त्यमुष्मिन्नेव तेन लोके प्रति तिष्ठन्तीयं ँवाव ज्योतिरन्तरिक्षं
गौरसावायु-र्यदेतान्थ्-स्तोमा-नुपयन्त्येष्वेव तल्लोकेषु सत्रिणः प्रति
तिष्ठन्तो यन्ति ते सꣳस्तुता विराज - [ ] 34

**7.4.11.2**

-मभि संपद्यन्ते द्वे चर्चावति रिच्येते एकया गौरतिरिक्त एकयाऽऽयुरूनः
सुवर्गो वै लोको ज्योतिरूर्ग्-विराडूर्ज-मेवाव रुन्धते ते न क्षुधा
ऽऽर्तिमार्च्छन्त्यक्षोधुका भवन्ति क्षुथ् संबाधा इव हि सत्रिणो
ऽग्निष्टोमावभितः प्रधी तावुक्थ्या मध्ये नभ्यं तत् तदेतत् परियद्-
देवचक्रं ँयदेतेन - [ ] 35

**7.4.11.3**

षडहेन यन्ति देवचक्रमेव समारोहन्त्यरिष्ट्यै ते स्वस्ति समश्नुवते षडहेन यन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्त्युभयतो ज्योतिषा यन्त्युभयत एव सुवर्गे लोके प्रतितिष्ठन्तो यन्ति द्वौ षडहौ भवतस्तानि द्वादशाहानि सं पद्यन्ते द्वादशो वै पुरुषो द्वे सक्थ्यौ द्वौ बाहू आत्मा च शिरश्च चत्वार्यङ्गानि स्तनौ द्वादशौ - [ ] **36**

**7.4.11.4**

तत् पुरुषमनु पर्यावर्तन्ते त्रयः षडहा भवन्ति तान्यष्टादशाहानि सं पद्यन्ते नवान्यानि नवान्यानि नव वै पुरुषे प्राणास्तत् प्राणाननु पर्यावर्तन्ते चत्वारः षडहा भवन्ति तानि चतुर्वि(ग्)शतिरहानि सं पद्यन्ते चतुर्वि(ग्)शतिरर्धमासाः सँवथ्सरस्तथ् सँवथ्सरमनु पर्यावर्तन्ते ऽप्रतिष्ठितः सँवथ्सर इति खलु वा आहुर्वर्.षीयान् प्रतिष्ठाया इत्येतावद्वै ( ) सँवथ्सरस्य ब्राह्मणं ँयावन्मासो मासिमास्येव प्रतितिष्ठन्तो यन्ति । **37**

*(विराज - मेतेन - द्वादशा - वेतावद्वा - अष्टौ च) (A11)*

**7.4.12.1**

मेषस्त्वा पचतैरवतु लोहितग्रीवः छागैः शल्मलिर्वृद्ध्या पर्णो ब्रह्मणा प्लक्षो मेधेन न्यग्रोधश्चमसैरुदुंबर ऊर्जा गायत्री छन्दोभिस्त्रिवृथ् स्तोमैरवन्तीः स्थावन्तीस्त्वाऽवन्तु प्रियं त्वा प्रियाणां ँवर्.षिष्ठमाप्यानां निधीनां त्वा निधिपतिꣳ हवामहे वसो मम । **38**

*(मेषः - षट् त्रिꣳशत्) (A12)*

**7.4.13.1**

कूप्याभ्यः स्वाहा कूल्याभ्यः स्वाहा विकर्याभ्यः स्वाहा ऽवट्याभ्यः स्वाहा खन्याभ्यः स्वाहा ह्रद्याभ्यः स्वाहा सूद्याभ्यः स्वाहा सरस्याभ्यः स्वाहा वैशन्तीभ्यः स्वाहा पल्वल्याभ्यः स्वाहा वर्.ष्याभ्यः स्वाहा ऽवर्.ष्याभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा पृष्वाभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा स्थावराभ्यः स्वाहा नादेयीभ्यः स्वाहा सैन्धवीभ्यः स्वाहा समुद्रियाभ्यः स्वाहा सर्वाभ्यः स्वाहा । **39**

*(कूप्याभ्य - श्चत्वारिꣳशत्) (A13)*

**7.4.14.1**

अद्भ्यः स्वाहा वहन्तीभ्यः स्वाहा परिवहन्तीभ्यः स्वाहा समन्तं

ँवहन्तीभ्यः स्वाहा शीघ्रं ँवहन्तीभ्यः स्वाहा शीभं ँवहन्तीभ्यः

स्वाहोग्रं ँवहन्तीभ्यः स्वाहा भीमं ँवहन्तीभ्यः स्वाहाऽम्भोभ्यः स्वाहा

नभोभ्यः स्वाहा महोभ्यः स्वाहा सर्वस्मै स्वाहा । **40**

*(अद्भ्य – एकान्न त्रि॒ꣳशत्) (A14)*

**7.4.15.1**

यो अर्वन्तं जिघाꣳसति तमभ्यमीति वरुणः । परो मर्तः परः श्वा ।

अहं च त्वं च वृत्रहन्थ्सं बभूव सनिभ्य आ ।

अरातीवा चिदद्रिवोऽनु नौ शूर मꣳसतै भद्रा इन्द्रस्य रातयः ।

अभि क्रत्वेन्द्र भूरध ज्मन्न ते विव्यङ्महिमानꣳ रजाꣳसि ।

स्वेना हि वृत्रꣳ शवसा जघन्थ न शत्रुरन्तं ँविविदद् ( ) युधा ते । **41**

*(विविदद् – द्वे च) (A15)*

**7.4.16.1**

नमो राज्ञे नमो वरुणाय नमोऽश्वाय नमः प्रजापतये नमोऽधिपतये

ऽधिपतिरस्यधिपतिं मा कुर्वधिपतिरहं प्रजानां भूयासं मां धेहि मयि

धेह्युपाकृताय स्वाहा ऽऽलब्धाय स्वाहा हुताय स्वाहा । 42

*(नम – एकान्न त्रिꣳशत्) (A16)*

**7.4.17.1**

मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधीरा रिशन्तां ।

पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मृड ।

याः सरूपा विरूपा एकरूपा यासामग्निरिष्ट्या नामानि वेद ।

या अङ्गिरसस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ ।

या देवेषु तनुवमैरयन्त यासाꣳ सोमो विश्वा रूपाणि वेद ।

ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिन्द्र – [ ] 43

**7.4.17.2**

गोष्ठे रिरीहि ।

प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः सँविदानः ।

शिवाः सतीरुप नो गोष्ठमाऽकस्तासां वयं प्रजया सꣳ सदेम ।

इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा

महीमू षु> 1 सुत्रामाणं> 2 । 44 *(इन्द्रा – ष्टात्रिꣳशच्च) (A17)*

**7.4.18.1**

कि॒ स्वि॑दासीत् पू॒र्वचि॑त्तिः कि॒ स्वि॑दासीद्-बृ॒हद्वयः॑ ।

कि॒ स्वि॑दासीत् पिशंगि॒ला कि॒ स्वि॑दासीत् पिलिप्पि॒ला ।

द्यौरा॑सीत् पू॒र्वचि॑त्ति॒रश्व॑ आसीद् बृ॒हद्वयः॑ ।

रात्रि॑रासीत् पिशङ्गि॒ला ऽवि॑रासीत् पिलिप्पि॒ला ।

कः स्वि॑दे॒काकी॑ चरति॒ क उ॑ स्विज्जायते॒ पुनः॑ ।

कि॒ स्वि॑द्धि॒मस्य॑ भे॒षजं कि॒ स्वि॑दा॒वप॑नं म॒हत् ।

सूर्य॑ ए॒काकी॑ चरति – [ ] **45**

**7.4.18.2**

च॒न्द्रमा॑ जायते॒ पुनः॑ । अ॒ग्नि॒र्हि॒मस्य॑ भे॒षजं॑ भू॒मिरा॒वप॑नं म॒हत् ।

पृ॒च्छामि॑ त्वा॒ प॒रमन्तं॑ पृ॒थि॒व्याः पृ॒च्छामि॑ त्वा॒ भुव॑नस्य॒ नाभिं॑ ।

पृ॒च्छामि॑ त्वा॒ वृष्णो॒ अश्व॑स्य॒ रेतः॑ पृ॒च्छामि॑ वा॒चः प॑र॒मं व्यो॑म ।

वेदि॑मा॒हुः प॒रमन्तं॑ पृ॒थि॒व्या य॒ज्ञमा॑हु॒ र्भुव॑नस्य॒ नाभिं॑ ।

सोम॑मा॒हु॒र्वृष्णो॒ अश्व॑स्य॒ रेतो॒ ब्र॒ह्मैव वा॒चः प॑र॒मं व्यो॑म । **46**

*(सूर्य॑ ए॒काकी॑ च॑र॒ति – षट् च॑त्वारि॒ꣳशच्च) (A18)*

**7.4.19.1**

अंबे अंबाल्यंबिके न मा नयति कश्चन । ससस्त्यश्वकः ।

सुभगे कांपीलवासिनि सुवर्गे लोके सं प्रोर्ण्वाथां ।

आऽहमजानि गर्भधमा त्वमजासि गर्भधं ।

तौ सह चतुरः पदः सं प्र सारयावहै ।

वृषा वा॒ रेतोधा रेतो दधातूथ् सक्थ्योर्गृदं धेह्यञ्जिमुदञ्जिमन्वज ।

यः स्त्रीणां जीवभोजनो य आसां – [ ] 47

**7.4.19.2**

बिलधावनः । प्रियः स्त्रीणामपीच्यः ।

य आसां कृष्णे लक्ष्मणि सर्दिगृदिं परावधीत् ।

अंबे अंबाल्यंबिके न मा यभति कश्चन । ससस्त्यश्वकः ।

ऊर्ध्वा–मेनामुच्छ्रयताद्–वेणुभारं गिराविव ।

अथास्या मध्यमेधता॒ शीते वाते पुनन्निव ।

अंबे अंबाल्यंबिके न मा यभति कश्चन । ससस्त्यश्वकः ।

यद्धरिणी यवमत्ति न – [ ] 48

**7.4.19.3**

पुष्टं पशु मन्यते । शूद्रा यदर्यजारा न पोषाय धनायति ।

अंबे अंबाल्यंबिके न मा यभति कश्चन । ससस्त्यश्वकः ।

इयं यँका शकुन्तिका ऽऽहलमिति सर्पति ।

आहतं गभे पसो नि जल्गुलीति धाणिका ।

अंबे अंबाल्यंबिके न मा यभति कश्चन । ससस्त्यश्वकः ।

माता च ते पिता च तेऽग्रं वृँक्षस्य रोहतः ( ) । **49**

**7.4.19.4**

प्र सुलामीति ते पिता गभे मुष्टिमत৺सयत् ।

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।

सुरभि नो मुखा करत् प्रण आयू৺षि तारिषत् ।

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महेरणाय चक्षसे ।

यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ।

तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ ( ) ।

आपो जनयथा च नः । **50**

*(आसा - मत्ति न - रोहतो - जिन्वथ - चत्वारि च) (A19)*

**7.4.20.1**

भूर्भुवः सुवर्वसवस्त्वा ऽञ्जन्तु गायत्रेण छन्दसा रुद्रास्त्वा ऽञ्जन्तु त्रैष्टुभेन छन्दसा ऽऽदित्यास्त्वाऽञ्जन्तु जागतेन छन्दसा यद्-वातो अपो अगमदिन्द्रस्य तनुवं प्रियां । एत७ स्तोतरेतेन पथा पुनरश्वमा वर्तयासि नः । लाजी(**3**)ञ्छाची(**3**)न् यशो ममा(**4**)ँ ।

यव्यायै गव्याया एतद्-देवा अन्नमत्तैतदन्नमद्धि प्रजापते ।

युञ्जन्ति ब्रध्न ( ) -मरुषं चरन्तं परि तस्थुषः ।

रोचन्ते रोचना दिवि । युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे ।

शोणा धृष्णू नृवाहसा । केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे ।

समुषद्भिरजायथाः । **51**

*(ब्रध्नं - पञ्चवि९शतिश्च) (A20)*

**7.4.21.1**

प्राणाय स्वाहा व्यानाय स्वाहा ऽपानाय स्वाहा स्नावभ्यः स्वाहा संतानेभ्यः स्वाहा परिसंतानेभ्यः स्वाहा पर्वभ्यः स्वाहा संधानेभ्यः स्वाहा शरीरेभ्यः स्वाहा यज्ञाय स्वाहा दक्षिणाभ्यः स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा । **52**

*(प्राणाया - ष्टाविꣳशतिः) (A21)*

**7.4.22.1**

सिताय स्वाहा ऽसिताय स्वाहा ऽभिहिताय स्वाहा ऽनभिहिताय स्वाहा युक्ताय स्वाहा ऽयुक्ताय स्वाहा सुयुक्ताय स्वाहो -द्युक्ताय स्वाहा विमुक्ताय स्वाहा प्रमुक्ताय स्वाहा वञ्चते स्वाहा परिवञ्चते स्वाहा सँवञ्चते स्वाहा ऽनुवञ्चते स्वाहोद् -वञ्चते स्वाहा यते स्वाहा धावते स्वाहा तिष्ठते स्वाहा सर्वस्मै स्वाहा । **53**

*(सिताया - ष्टात्रिꣳशत्) (A22)*

**Prasna Korvai with starting Padams of 1 to 22 Anuvaakams :-**

(बृहस्पतिः श्रद् – यथा वा – ऋक्षा वै – प्रजापतिर्येनयेन – द्वे वाव देवसत्रे – आदित्या अकामयन्त सुवर्गं – ँवसिष्ठः – सँवथ्सराय – सुवर्गं ँये सत्रं – ब्रह्मवादिनोऽतिरात्रो – ज्योतिष्टोमं – मेषः – कूप्याभ्यो – ऽद्भ्यो – यो – नमो – मयोभूः – किँ स्विद – म्बे – भूः – प्राणाय – सिताय – द्वावि ँशतिः)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(बृहस्पतिः – प्रति तिष्ठन्ति – वै दशरात्रेण – सुवर्गं – ँयो अर्वन्तं – भू – स्त्रिपञ्चाशत्)

**First and Last Padam of Fourth Prasnam of 7th Kandam**

(बृहस्पतिः – सर्वस्मै स्वाहा)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां सप्तमकाण्डे चतुर्थः प्रश्नः समाप्तः ॥

---

## 7.4.1 Appendix

**7.4.17.2 – महीमूषु>1 सुत्रामाणं>2**

महीमूषु मातरं॑ सुव्रतानामृतस्य पत्नीमवसे हुवेम ।
तुविक्षत्रामजरन्तीमुरूचीं॑ सुशर्माणमदितिं॑ सुप्रणीतिं ॥

सुत्रामाणं पृथिवीं द्यामनेहसं॑ सुशर्माण मदितिं॑ सुप्रणीतिं ।
दैवीं नावं॑ स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये ॥

(Appearing in T.S.1.5.11.5)

ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः

हरिः ओं

## 7.5 सप्तमकाण्डे पञ्चमः प्रश्नः - सत्रविशेषाभिधानं

**7.5.1.1**

गावो वा एतथ् सत्र-मासताशृङ्गाः सतीः शृङ्गाणि नो जायन्ता इति कामेन तासां दश मासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त ता उदतिष्ठन्नराथ्स्मेत्यथ यासां नाजायन्त ताः सँवथ्सर-माप्त्वोदतिष्ठ -न्नराथ्स्मेति यासां चाजायन्त यासां च न ता उभयीरु-दतिष्ठ-न्नराथ्स्मेति गोसत्रं वै - [ ] 1

**7.5.1.2**

सँवथ्सरो य एवं विद्वाꣳसः सँवथ्सर-मुपयन्त्यृध्नुवन्त्येव तस्मात् तूपरा वार्.षिकौ मासौ पर्त्वा चरति सत्राभिजितꣳ ह्यस्यै तस्माथ् सँवथ्सरसदो यत् किं च गृहे क्रियते तदाप्त-मवरुद्ध-मभिजितं क्रियते समुद्रं वा एते प्र प्लवन्ते ये सँवथ्सरमुपयन्ति यो वै समुद्रस्य पारं न पश्यति न वै स तत उदेति सँवथ्सरो - [ ] 2

**7.5.1.3**

वै समुद्रस्तस्यैतत् पारं यँदतिरात्रौ य एवं विँद्वांसः सँवथ्सर-
मुपयन्त्यनार्ता एवोदृचं गच्छन्तीयं वैँ पूर्वोऽतिरात्रो ऽसावुत्तरो मनः
पूर्वो वागुत्तरः प्राणः पूर्वोऽपान उत्तरः प्ररोधनं पूर्व उदयनमुत्तरो
ज्योतिष्टोमो वैश्वानरो ऽतिरात्रो भवति ज्योतिरेव पुरस्ताद्दधते सुवर्गस्य
लोकस्या-नुख्यात्यै चतुर्विꣳशः प्रायणीयो भवति चतुर्विꣳशति-
रर्धमासाः – [ ] **3**

**7.5.1.4**

सँवथ्सरः प्रयन्त एव सँवथ्सरे प्रति तिष्ठन्ति तस्य त्रीणि च शतानि
षष्टिश्च स्तोत्रीयास्तावतीः सँवथ्सरस्य रात्रय उभे एव सँवथ्सरस्य
रूपे आप्नुवन्ति ते सꣳस्थित्या अरिष्ट्या उत्तरैरहोभिश्चरन्ति षडहा
भवन्ति षड् वा ऋतवः सँवथ्सर ऋतुष्वेव सँवथ्सरे प्रति तिष्ठन्ति
गौश्चाऽऽ*युश्च मध्यतः स्तोमौ भवतः सँवथ्सरस्यैव तन्मिथुनं
मध्यतो –[ ] **4**

**7.5.1.5**

दधति प्रजननाय ज्योतिरभितो भवति विमोचनमेव तच्छन्दा७ँस्येव तद्-विमोकं ँयन्त्यथो उभयतोज्योतिषैव षडहेन सुवर्गं ँलोकं ँयन्ति ब्रह्मवादिनो वदन्त्यासते केन यन्तीति देवयानेन पथेति ब्रूयाच्छन्दा७ँसि वै देवयानः पन्था गायत्री त्रिष्टुब्-जगती ज्योतिर्वै गायत्री गौस्त्रिष्टुगायुर्जगती यदेते स्तोमा भवन्ति देवयानेनैव - [ ] **5**

**7.5.1.6**

तत् पथा यन्ति समान७ँ साम भवति देवलोको वै साम देवलोकादेव न यन्त्यन्या अन्या ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेवान्यमन्यं देवलोकमभ्यारोहन्तो यन्त्यभिवर्तो ब्रह्मसामं भवति सुवर्गस्य लोकस्याभिवृत्या अभिजिद्-भवति सुवर्गस्य लोकस्याभिजित्यै विश्वजिद्-भवति विश्वस्य जित्यै मासिमासि पृष्ठान्युप यन्ति मासिमास्यतिग्राह्या गृह्यन्ते मासिमास्येव वीर्यं ( ) दधति मासां प्रतिष्ठित्या उपरिष्टान्मासां पृष्ठान्युप यन्ति तस्मादुपरिष्टादोषधयः फलं गृह्णन्ति । **6**

*(गोसत्रं वाँ - एति सँवथ्सरो - ऽर्द्धमासा - मिथुनं मध्यतो - देवयानेनैव - वीर्यं - त्रयोदश च) (A1)*

**7.5.2.1**

गावो वा एतथ् सत्रमासताशृङ्गाः सतीः शृङ्गाणि सिषासन्तीस्तासां दश मासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त ता अब्रुवन्नराथ्स्मोत् तिष्ठामाव तं काममरुथ्स्महि येन कामेन न्यषदामेति तासामु त्वा अब्रुवन्नर्धावा यावतीर्वाऽसामहा एवेमौ द्वादशौ मासौ सँवथ्सरं संपाद्योत् तिष्ठामेति तासां -[ ] 7

**7.5.2.2**

द्वादशे मासि शृङ्गाणि प्रावर्तन्त श्रद्धया वाऽश्रद्धया वा ता इमा यास्तूपरा उभय्यो वाव ता आर्ध्नुवन् याश्च शृङ्गाण्यसन्वन् याश्चोर्जमवारुन्धतर्ध्नोति दशसु मासूत्तिष्ठन्नृध्नोति द्वादशसु य एवं वेँद पदेन खलु वा एते यन्ति विन्दति खलु वै पदेन यन् तद्वा एतदृद्धमयनं तस्मा ( ) देतद्-गोसनि । 8

*(तिष्ठामेति तासां - तस्माद् - द्वे च) (A2)*

**7.5.3.1**

प्रथमे मासि पृष्ठान्युप यन्ति मध्यम उप यन्त्युत्तम उप यन्ति
तदाहुर्यां वै त्रिरेकस्याह्न उपसीदन्ति दह्नं वै साऽपराभ्यां
दोहाभ्यां दुहेऽथ कुतः सा धोक्ष्यते यां द्वादश कृत्व उपसीदन्तीति
सँवथ्सरं संपाद्योत्तमे मासि सकृत् पृष्ठान्युपेयुस्तद्-यजमाना
यज्ञं पशूनव रुन्धते समुद्रं वा – [ ] 9

**7.5.3.2**

एतेनवारमपारं प्र प्लवन्ते ये सँवथ्सरमुपयन्ति यद् बृहद्-रथन्तरे
अन्वर्जेयुर्यथा मध्ये समुद्रस्य प्लवमन्वर्जेयुस्तादृक् तदनुथ्सर्गं
बृहद्-रथन्तराभ्यामित्वा प्रतिष्ठां गच्छन्ति सर्वेभ्यो वै कामेभ्यः
सन्धिर्दुहे तद्-यजमानाः सर्वान् कामानव रुन्धते । 10

*(समुद्रं वै – चतुस्त्रिंशच्च) (A3)*

**7.5.4.1**

समान्य ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेव न
यन्त्यन्यदन्यथ् साम भवति देवलोको वै साम देवलोकादेवान्यमन्यं
मनुष्यलोकं प्रत्यवरोहन्तो यन्ति जगतीमग्र उप यन्ति जगतीं वै

छन्दाꣳसि प्रत्यवरोहन्त्या-ग्रयणं ग्रहा बृहत् पृष्ठानि त्रयस्त्रिꣳश

स्तोमा- स्तस्मा-ज्ज्यायाꣳसं कनीयान् प्रत्यवरोहति वैश्वकर्मणो

गृह्यते विश्वान्येव तेन कर्माणि यजमाना अव रुन्धत

आदित्यो-[ ] **11**

**7.5.4.2**

गृह्यत इयं वा अदितिरस्यामेव प्रति तिष्ठन्त्यन्योऽन्यो गृह्येते

मिथुनत्वाय प्रजात्या अवान्तरं वै दशरात्रेण प्रजापतिः प्रजा असृजत

यद्-दशरात्रो भवति प्रजा एव तद्-यजमानाः सृजन्त एताꣳ ह वा

उदङ्कः शौल्बायनः सत्रस्यर्द्धिमुवाच यद्-दशरात्रो यद्-दशरात्रो

भवति सत्रस्यद्ध्यी अथो यदेव पूर्वेष्वहःसु विलोम क्रियते

तस्यैवै ( ) -षा शान्तिः । **12**

*(आदित्य - स्तस्यैव - द्वे च) (A4)*

**7.5.5.1**

यदि सोमौ सꣳसुतौ स्यातां महति रात्रियै प्रातरनुवाक-मुपाकुर्यात्

पूर्वो वाचं पूर्वो देवताः पूर्वः छन्दाꣳसि वृङ्क्ते वृषण्वतीं प्रतिपदं

कुर्यात् प्रातः सवनादेवैषामिन्द्रं वृङ्क्ते ऽथो खल्वाहुः सवनमुखे-

सवनमुखे कार्येति सवनमुखाथ् सवनमुखा-देवैषामिन्द्रं

वृङ्क्ते सँवेशायोपवेशाय गायत्रियास्त्रिष्टुभो जगत्या अनुष्टुभः

पङ्क्त्या अभिभूत्यै स्वाहा छन्दाꣳसि वै सँवेश उपवेशः

छन्दोभिरेवैषां- [ ] **13**

**7.5.5.2**

छन्दाꣳसि वृङ्क्ते सजनीयꣳ शस्यं विहव्यꣳ शस्यमगस्त्यस्य

कयाशुभीयꣳ शस्यमेतावद्वा अस्ति यावदेतद्-यावदेवास्ति तदेषां

वृङ्क्ते यदि प्रातः सवने कलशो दीर्येत वैष्णवीषु शिपिविष्टवतीषु

स्तुवीरन् यद्वै यज्ञस्या-तिरिच्यते विष्णुं तच्छिपिविष्टमभ्यति रिच्यते

तद्विष्णुः शिपिविष्टोऽतिरिक्त एवातिरिक्तं दधात्यथो अतिरिक्तेनैवा-

तिरिक्तमाप्त्वाऽव ( ) रुन्धते यदि मध्यन्दिने दीर्येत वषट्कारनिधनꣳ

साम कुर्युर्वषट्कारो वै यज्ञस्य प्रतिष्ठा प्रतिष्ठामेवैनद्-गमयन्ति यदि

तृतीयसवन एतदेव । **14**

*(छन्दोभिरेवैषा - मवै - कान्नविꣳशतिश्च) (A5)*

**7.5.6.1**

षडहैर्मासान्थ् संपाद्याहरुथ् सृजन्ति षडहैर्हि मासान्थ् संपश्यन्त्य-
र्द्धमासैर्मासान्थ् संपाद्याहरुथ् सृजन्त्य-र्धमासैर्हि मासान्थ्
संपश्यन्त्यमावास्यया मासान्थ् संपाद्याहरुथ् सृजन्त्यमावास्यया हि
मासान्थ् संपश्यन्ति पौर्णमास्या मासान्थ् संपाद्याऽहरुथ् सृजन्ति
पौर्णमास्या हि मासान्थ् संपश्यन्ति यो वै पूर्ण आसिञ्चति परा स
सिञ्चति यः पूर्णादुदचति - [ ] 15

**7.5.6.2**

प्राणमस्मिन्थ्स दधाति यत् पौर्णमास्या मासान्थ् संपाद्याहरुथ् सृजन्ति
सँवथ्सरायैव तत् प्राणं दधति तदनु सत्रिणः प्राणन्ति
यदहर्नोथ्-सृजेयुर्यथा दृतिरुपनद्धो विपतत्येवꣳ सँवथ्सरो
वि पतेदार्ति-मार्च्छेयुर्यत् पौर्णमास्या मासान्थ्-संपाद्याहरुथ् सृजन्ति
सँवथ्सरायैव तदुदानं दधति तदनु सत्रिण उ - [ ] 16

**7.5.6.3**

दनन्ति नाऽऽ*र्तिमार्च्छन्ति पूर्णमासे वै देवाना॑ꣳ सुतो यत् पौर्णमास्या

मासान्थ्-संपाद्याहरुथ् सृजन्ति देवानामेव तद्-यज्ञेन यज्ञं

प्रत्यवरोहन्ति वि वा एतद्-यज्ञं छिन्दन्ति यथ् षडहसंततꣳ

संतमथाहरुथ् सृजन्ति प्राजापत्यं पशुमा लभन्ते प्रजापतिः सर्वा देवता

देवताभिरेव यज्ञꣳ सं तन्वन्ति यन्ति वा एते सवनाद्येऽह-[ ] 17

**7.5.6.4**

-रुथ् सृजन्ति तुरीयं खलु वा एतथ् सवनं ँयथ् सांनाय्यं ँयथ्

सांनाय्यं भवति तेनैव सवनान्न यन्ति समुपहूय भक्षयन्त्येतथ्

सोमपीथा ह्येतर्.हि यथायतनं ँवा एतेषाꣳ सवनभाजो देवता गच्छन्ति

येऽहरुथ् सृजन्त्यनुसवनं पुरोडाशान् निर्वपन्ति यथायतनादेव

सवनभाजो देवता अव रुन्धतेऽष्टाकपालान् प्रातःसवन

एकादशकपालान् माध्यन्दिने सवने द्वादशकपालाꣳ-स्तृतीयसवने

छन्दाꣳस्येवाऽऽ*प्त्वा ( ) -ऽव रुन्धते वैश्वदेवं चरुं तृतीयसवने

निर्वपन्ति वैश्वदेवं ँवै तृतीयसवनं तेनैव तृतीयसवनान्न यन्ति । 18

*(उदच - त्यु - द्यौऽह - राप्त्वा - पञ्चदश च) (A6)*

**7.5.7.1**

उथ्सृज्यां(3)नोथ्सृज्या(3)मिति मीमा॒ꣳसन्ते ब्रह्मवादिन-स्तद्वाहुरुथ्

सृज्यमेवेत्य-मावास्यायां च पौर्णमास्यां चोथ्-सृज्यमित्याहुरेते हि

यज्ञं ँवहत इति ते त्वाव नोथ्सृज्ये इत्याहुर्ये अवान्तरं ँयज्ञं भेजाते

इति या प्रथमा व्यष्टका तस्यामुथ्-सृज्यमित्याहुरेष वै मासो विशर

इति नाऽऽ*दिष्ट - [ ] 19

**7.5.7.2**

-मुथ्सृजेयु-र्यदादिष्ट-मुथ्सृजेयुर्यादृशे पुनः पर्याप्लावे मध्ये

षडहस्य संपद्येत षडहैर्मासान्थ् संपाद्य यथ् सप्तम- महस्तस्मिन्नुथ्

सृजेयु-स्तदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपेयुरैन्द्रं दधीन्द्राय

मरुत्वते पुरोडाशमेकादशकपालं ँवैश्वदेवं द्वादशकपालमग्नेर्वै

वसुमतः प्रातः सवनं ँयदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपन्ति

देवतामेव तद्-भागिनीं कुर्वन्ति - [ ] 20

**7.5.7.3**

सवनमष्टाभिरुप यन्ति यदैन्द्रं दधि भवतीन्द्रमेव तद्-भागधेयान्न
च्यावयन्तीन्द्रस्य वै मरुत्वतो माध्यन्दिन(ग्ं) सवनं (ँ)यदिन्द्राय मरुत्वते
पुरोडाशमेकादशकपालं निर्वपन्ति देवतामेव तद्-भागिनीं कुर्वन्ति
सवनमेकादशभिरुप यन्ति विश्वेषां (ँ)वै देवानामृभुमतां तृतीयसवनं
(ँ)यद्-वैश्वदेवं द्वादशकपालं निर्वपन्ति देवता एव तद्-भागिनीः
कुर्वन्ति सवनं द्वादशभि - [ ] **21**

**7.5.7.4**

-रुप यन्ति प्राजापत्यं पशुमा लभन्ते यज्ञो वै प्रजापति-र्यज्ञस्या-
ननुसर्गायाभिवर्त इतः षण्मासो ब्रह्मसामं भवति ब्रह्म वा अभिवर्तो
ब्रह्मणैव तथ् सुवर्गं (ँ)लोक-मभिवर्तयन्तो यन्ति प्रतिकूलमिव हीतः
सुवर्गो लोक इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा नो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहीत्य ( ) -मुत
आयता(ग्ं) षण्मासो ब्रह्मसामं भवत्ययं (ँ)वै लोको ज्योतिः प्रजा
ज्योतिरिममेव तल्लोकं पश्यन्तोऽभिवदन्त आ यन्ति । **22**

*(नाऽऽदिष्टं - कुर्वन्ति - द्वादशभि - रिति- विꣳशतिश्च) (A7)*

**7.5.8.1**

देवानां ँवा अन्तं जग्मुषामिन्द्रियं ँवीर्य-मपाक्रामत् तत्
क्रोशेनावारुन्धत तत् क्रोशस्य क्रोशत्वं ँयत् क्रोशेन चात्वालस्यान्ते
स्तुवन्ति यज्ञस्यैवान्तं गत्वेन्द्रियं ँवीर्यमव रुन्धते सत्रस्यर्ध्या
ऽऽहवनीयस्यान्ते स्तुवन्त्यग्नि-मेवोपद्-रष्टारं कृत्वर्द्धिमुप यन्ति
प्रजापतेर्.हृदयेन हविर्द्धानेऽन्तः स्तुवन्ति प्रेमाणमेवास्य
गच्छन्ति श्लोकेन पुरस्ताथ् सदसः - [ ] **23**

**7.5.8.2**

स्तुवन्त्यनुश्लोकेन पश्चाद्-यज्ञस्यैवान्तं गत्वा श्लोकभाजो भवन्ति
नवभि-रद्ध्वर्युरुद्-गायति नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु
दधाति सर्वा ऐन्द्रियो भवन्ति प्राणेष्वेवेन्द्रियं दध-त्यप्रतिहृताभिरुद्-
गायति तस्मात् पुरुषः सर्वाण्यन्यानि शीर्.ष्णोऽङ्गानि प्रत्यचति शिर
एव न पञ्चदशꣳ रथन्तरं भवतीन्द्रियमेवाव रुन्धते सप्तदशं-[ ] **24**

**7.5.8.3**

बृह-दन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्त एकवि॒ꣳशं भद्रं
द्विपदासु प्रतिष्ठित्यै पत्नय उप गायन्ति मिथुनत्वाय प्रजात्यै प्रजापतिः
प्रजा असृजत सोऽकामयताऽऽ*सामह॒ꣳ राज्यं परीयामिति तासा॒ꣳ
राजनेनैव राज्यं पर्यैत् तद्-राजनस्य राजनत्वं ँयद्-राजनं भवति
प्रजानामेव तद्-यजमाना राज्यं परि यन्ति पञ्चवि॒ꣳशं भवति
प्रजापते - [ ] **25**

**7.5.8.4**

-राप्त्यै पञ्चभि-स्तिष्ठन्तः स्तुवन्ति देवलोकमेवाभि जयन्ति
पञ्चभिरासीना मनुष्यलोकमेवाभि जयन्ति दश संपद्यन्ते दशाक्षरा
विराडन्नं ँविराड् विराजैवा-न्नाद्यमव रुन्धते पञ्चधा विनिषद्य स्तुवन्ति
पञ्च दिशो दिक्षवेव प्रतितिष्ठन्त्येकैकयाऽस्तुतया समायन्ति दिग्भ्य
एवान्नाद्य॒ꣳ सं भरन्ति ताभि-रुद्गातोद्-गायति दिग्भ्य
एवान्नाद्य॒ꣳ-[ ] **26**

**7.5.8.5**

संभृत्य तेज आत्मन् दधते तस्मादेकः प्राणः सर्वाण्यङ्गान्यवत्यथो यथा सुपर्ण उत्पतिष्यञ्छिर उत्तमं कुरुत एवमेव तद्-यजमानाः प्रजानामुत्तमा भवन्त्यासन्दी-मुद्गाता ऽऽरोहति साम्राज्यमेव गच्छन्ति प्लेङ्खꣳ होता नाकस्यैव पृष्ठꣳ रोहन्ति कूर्चावध्वर्यु-र्ब्रध्नस्यैव विष्टपं गच्छन्त्येतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रति ( ) तिष्ठन्त्यथो आक्रमणमेव तथ् सेतुं यजमानाः कुर्वते सुवर्गस्य लोकस्य समष्ट्यै । **27** *(सदसः - सप्तदशं - प्रजापते - र्गायति दिग्भ्य एवान्नाद्यं - प्रत्ये - कादश च) (A8)*

**7.5.9.1**

अर्क्येण वै सहस्रशः प्रजापतिः प्रजा असृजत ताभ्य इलांदेनेरां ँलूतामवारुन्ध यदर्क्यं भवति प्रजा एव तद्-यजमानाः सृजन्त इलांदं भवति प्रजाभ्य एव सृष्टाभ्य इरां ँलूतामव रुन्धते तस्माद्याꣳ समाꣳ सत्रꣳ समृद्धं क्षोधुकास्ताꣳ समां प्रजा इषꣳ ह्यासामूर्जमाददते याꣳ समां ँव्यृद्ध-मक्षोधुकास्ताꣳ

समां प्रजा - [ ] 28

7.5.9.2

न ह्यासामिषमूर्जमाददत उत्क्रोदं कुर्वते यथा बन्धान्-मुमुचाना
उत्क्रोदं कुर्वत एवमेव तद्-यजमाना देवबन्धान्-मुमुचाना उत्क्रोदं
कुर्वत इषमूर्जमात्मन् दधाना वाणः शततन्तुर्भवति शतायुः पुरुषः
शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्त्याजिं धावन्त्यनभिजितस्या-
भिजित्यै दुन्दुभीन्थ् समाघ्नन्ति परमा वा एषा वाग्या दुन्दुभौ
परमामेव - [ ] 29

7.5.9.3

वाचमव रुन्धते भूमिदुन्दुभिमा घ्नन्ति यैवेमां ँवाक् प्रविष्टा तामेवाव
रुन्धते ऽथो इमामेव जयन्ति सर्वा वाचो वदन्ति सर्वासां
ँवाचामवरुद्ध्या आर्द्रे चर्मन् व्यायच्छेते इन्द्रियस्या वरुद्ध्या आऽन्यः
क्रोशति प्रान्यः शꣳसति य आक्रोशति पुनात्येवैनान्थ्स यः
प्रशꣳसति पूतेष्वेवान्नाद्यं दधात्यृषिकृतं च - [ ] 30

**7.5.9.4**

वा एते देवकृतं च पूर्वैर्मासैरव रुन्धते यद्-भूतेच्छदाꣳ सामानि

भवन्त्युभयस्यावरुद्ध्यै यन्ति वा एते मिथुनाद्ये सँवथ्सर-

मुपयन्त्यन्तर्वेदि मिथुनौ सं भवतस्तेनैव मिथुनान्न यन्ति । **31**

*(व्यृद्धमक्षोधुकास्ताꣳ समां प्रजाः - परमामेव - च -*

*त्रिꣳशच्च) (A9)*

**7.5.10.1**

चर्माव भिन्दन्ति पाप्मानमेवैषामव भिन्दन्ति माऽप राथ्सीर्माऽति

व्याथ्सीरित्याह संप्रत्येवैषां पाप्मानमव भिन्दन्त्युदकुम्भानधिनिधाय

दास्यो मार्जालीयं परि नृत्यन्ति पदो निघ्नतीरिदंमधुं गायन्त्यो

मधु वै देवानां परम-मन्नाद्यं परममेवा-न्नाद्यमव रुन्धते

पदो नि घ्नन्ति महीयामेवैषु दधति । **32**

*(चर्मै - कान्न पञ्चाशत्) (A10)*

**7.5.11.1**

पृथिव्यै स्वाहा ऽन्तरिक्षाय स्वाहा दिवे स्वाहा संप्लोष्यते स्वाहा

संप्लवमानाय स्वाहा संप्लुताय स्वाहा मेघायिष्यते स्वाहा मेघायते

स्वाहा मेघिताय स्वाहा मेघाय स्वाहा नीहाराय स्वाहा निहाकायै स्वाहा प्रासचाय स्वाहा प्रचलाकायै स्वाहा विद्योतिष्यते स्वाहा विद्योतमानाय स्वाहा सँविद्योतमानाय स्वाहा स्तनयिष्यते स्वाहा स्तनयते स्वाहो –ग्रँ स्तनयते स्वाहा वर्.षिष्यते स्वाहा वर्.षते स्वाहा ऽभिवर्.षते स्वाहा परिवर्.षते स्वाहा सँवर्.षते – [ ] 33

**7.5.11.2**

स्वाहा ऽनुवर्.षते स्वाहा शीकायिष्यते स्वाहा शीकायते स्वाहा शीकिताय स्वाहा प्रोषिष्यते स्वाहा प्रुष्णते स्वाहा परिप्रुष्णते स्वाहो– द्ग्रहीष्यते स्वाहो द्गृह्णते स्वाहो–द्गृहीताय स्वाहा विप्लोष्यते स्वाहा विप्लवमानाय स्वाहा विप्लुताय स्वाहा ऽऽतफ्स्यते स्वाहा ऽऽतपते स्वाहो–ग्रमातपते स्वाह –ग्भ्र्यः स्वाहा यजुर्भ्यः स्वाहा सामभ्यः स्वाह ऽङ्गिरोभ्यः स्वाहा वेदेभ्यः स्वाहा गाथाभ्यः स्वाहा नाराशꣳसीभ्यः स्वाहा रैभीभ्यः स्वाहा ( ) सर्वस्मै स्वाहा । 34

*(सँवर्.षते – रैभीभ्यः स्वाहा – द्वे च) (A11)*

**7.5.12.1**

दत्वते स्वाहा ऽदन्तकाय स्वाहा प्राणिने स्वाहा ऽप्राणाय स्वाहा
मुखवते स्वाहा ऽमुखाय स्वाहा नासिकवते स्वाहा ऽनासिकाय
स्वाहा ऽक्षण्वते स्वाहा ऽनक्षिकाय स्वाहा कर्णिने स्वाहा ऽकर्णकाय
स्वाहा शीर्.षण्वते स्वाहा ऽशीर्.षकाय स्वाहा पद्वते स्वाहा
ऽपादकाय स्वाहा प्राणते स्वाहा ऽप्राणते स्वाहा वदते स्वाहा ऽवदते
स्वाहा पश्यते स्वाहा ऽपश्यते स्वाहा शृण्वते स्वाहा ऽशृण्वते स्वाहा
मनस्विने स्वाहा – [ ] **35**

**7.5.12.2**

ऽमनसे स्वाहा रेतस्विने स्वाहा ऽरेतस्काय स्वाहा प्रजाभ्यः स्वाहा
प्रजननाय स्वाहा लोमवते स्वाहा ऽलोमकाय स्वाहा त्वचे स्वाहा
ऽत्वक्काय स्वाहा चर्मण्वते स्वाहा ऽचर्मकाय स्वाहा लोहितवते स्वाहा
ऽलोहिताय स्वाहा मा॒ꣳसन्वते स्वाहा ऽमा॒ꣳसकाय स्वाहा स्नावभ्यः
स्वाहा ऽस्नावकाय स्वाहा स्थन्वते स्वाहा ऽनस्थिकाय स्वाहा
मज्जन्वते स्वाहा ऽमज्जकाय स्वाहा ऽङ्गिने स्वाहा ऽनङ्गाय स्वाहा

ऽऽत्मने स्वाहा ऽनात्मने स्वाहा ( ) सर्वस्मै स्वाहा । **36**

*(मनस्विने स्वाहा - ऽनात्मने स्वाहा - द्वे च) (A12)*

**7.5.13.1**

कस्त्वा युनक्ति स त्वा युनक्तु विष्णुस्त्वा युनक्त्वस्य यज्ञस्यर्द्ध्यै

मह्य॒ꣳ सन्नत्या अमुष्मै कामायाऽऽ*युषे त्वा प्राणाय त्वा ऽपानाय त्वा

व्यानाय त्वा व्युष्ट्यै त्वा रय्यै त्वा राधसे त्वा घोषाय त्वा पोषाय त्वा

ऽऽराद्घोषाय त्वा प्रच्युत्यै त्वा । **37** *(कस्त्वा - ष्षात्रिꣳशत्) (A13)*

**7.5.14.1**

अग्नये गायत्राय त्रिवृते राथन्तराय वासन्ताया-ष्टाकपाल

इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्.हताय ग्रैष्मायैकादशकपालो

विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो वार्.षिकेभ्यो

द्वादशकपालो मित्रावरुणाभ्या-मानुष्टुभाभ्या-मेकविꣳशाभ्यां

वैराजाभ्याꣳ शारदाभ्यां पयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय

शाक्वराय हैमन्तिकाय चरुः सवित्र आतिच्छन्दसाय त्रयस्त्रिꣳशाय

रैवताय शैशिराय द्वादशकपालो ऽदित्यै विष्णुपत्न्यै चरुरग्नये

वैश्वानराय द्वादशकपालो ऽनुमत्यै चरुः काय एककपालः । 38

*(अग्नयेऽदित्या अनुमत्यै - सप्तचत्वारि॑ शत्) (A14)*

**7.5.15.1**

यो वा अग्नावग्निः प्रह्रियते यश्च सोमो राजा तयोरेष आतिथ्यं

ँयदग्नीषोमीयोऽथैष रुद्रो यश्चीयते यथ् संचितेऽग्नावेतानि

हवी॑ षि न निर्वपेदेष एव रुद्रोऽशान्त उपोत्थाय प्रजां पशून्

यजमानस्याभि मन्येत यथ् संचितेऽग्नावेतानि हवी॑ षि निर्वपति

भागधेयेनैवैन॑ शमयति नास्य रुद्रोऽशान्त - [ ] 39

**7.5.15.2**

उपोत्थाय प्रजां पशूनभि मन्यते दश हवी॑ षि भवन्ति नव वै पुरुषे

प्राणा नाभिर्दशमी प्राणानेव यजमाने दधात्यथो दशाक्षरा विराडन्नं

ँविराड् विराज्येवान्नाद्ये प्रति तिष्ठत्यृतुभिर्वा एष छन्दोभि स्तोमैः

पृष्ठैश्चेतव्य इत्याहुर्यदेतानि हवी॑ षि निर्वपत्यृतुभिरेवैनं

छन्दोभि स्तोमैः पृष्ठैश्चिनुते दिशः सुषुवाणेना - [ ] 40

**7.5.15.3**

-भिजित्या इत्याहुर्यदेतानि हवी\ंषि निर्वपति दिशामभिजित्या एतया वा इन्द्रं देवा अयाजयन् तस्मादिन्द्रसव एतया मनुं मनुष्यास्तस्मान्-मनुसवो यथेन्द्रो देवानां\ँयथा मनुर्मनुष्याणामेवं भवति य एवं\ँविद्वानेतयेष्ट्या यजते दिग्वतीः पुरोऽनुवाक्या भवन्ति सर्वासां दिशामभिजित्यै । **41**

*(अशान्तः - सुषुवाणोनै - कचत्वारि\ंशच्च) (A15)*

**7.5.16.1**

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ।
उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्य ते द्यौर्महिमा नक्षत्राणि रूपमादित्यस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा । **42**

*(यः प्राणतो द्यौरादित्यो - ऽष्टात्रि\ंशत् ) (A16)*

**7.5.17.1**

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यँस्य देवाः ।
यस्य छायाऽमृतं यँस्य मृत्युः कस्मै देवाय हविषा विधेम ।
उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्य ते पृथिवी
महिमौषधयो वनस्पतयो रूपमग्निस्ते तेजस्तस्मै त्वा महिम्ने
प्रजापतये स्वाहा । **43**

*(य आत्मदाः पृथिव्यग्नि - रेकान्न चत्वारिꣳशत्) (A17)*

**7.5.18.1**

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा ऽस्मिन् राष्ट्रे राजन्य
इषव्यः शूरो महारथो जायतां दोग्ध्री धेनुर्वोढा ऽनड्वानाशुः
सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवा ऽऽस्य यजमानस्य
वीरो जायतां निकामेनिकामे नः पर्जन्यो वर्.षतु फलिन्यो न
ओषधयः पच्यन्तां यँोगक्षेमो नः कल्पतां । **44**

*(आ ब्रह्म - न्नेकचत्वारिꣳशत् ) (A18)*

**7.5.19.1**

आऽक्रान् वाजी पृथिवीमग्निं ँयुजमकृत वाज्यर्वा ऽऽक्रान् वाज्यन्तरिक्षं ँवायुं ँयुजमकृत वाज्यर्वा द्यां ँवाज्याऽक्र७ँस्त सूर्यं ँयुजमकृत वाज्यर्वा ऽग्निस्ते वाजिन् युङ्ङ्नु त्वा ऽऽ रभे स्वस्ति मा सं पारय वायुस्ते वाजिन् युङ्ङ्नु त्वा ऽऽ रभे स्वस्ति मा सं – [ ] **45**

**7.5.19.2**

पारया ऽऽदित्यस्ते वाजिन् युङ्ङ्नु त्वा ऽऽ रभे स्वस्ति मा सं पारय प्राणधृगसि प्राणं मे दृ७ँह व्यानधृगसि व्यानं मे दृ७ँहा ऽपानधृगस्यपानं मे दृ७ँह चक्षुरसि चक्षुर्मयि धेहि श्रोत्रमसि श्रोत्रं मयि धेह्यायुरस्यायुर्मयि धेहि । **46** *(वायुस्ते वाजिन् युङ्ङ्नु त्वा ऽऽ रभे स्वस्ति मा सं – त्रिचत्वारि७ँशच्च) (A19)*

**7.5.20.1**

जज्ञि बीजं ँवर्.ष्टा पर्जन्यः पक्ता सस्य७ँ सुपिप्पला ओषधयः स्वधिचरणेय७ँ सूपसदनोऽग्निः स्वध्यक्षमन्तरिक्ष७ँ सुपावः पवमानः सूपस्थाना द्यौः शिवमसौ तपन् यथापूर्वमहोरात्रे पञ्चदशिनो ऽर्धमासा–स्त्रि७ँशिनो मासाः क्लृप्ता ऋतवः शान्तः

सँवथ्सरः । 47 *(जज़ि बीज - मेकत्रिँशत्) (A20)*

**7.5.21.1**

आग्नेयोऽष्टाकपालः सौम्यश्चरुः सावित्रोऽष्टाकपालः पौष्णश्चरू

रौद्रश्चरुरग्नये वैश्वानराय द्वादशकपालो मृगाखरे यदि

नाऽऽ*गच्छे-दग्नये-ऽँहोमुचे-ऽष्टाकपालः सौर्यं पयो वायव्य

आज्यभागः । 48 *(आग्नेय - श्चतुर्विँशतिः) (A21)*

**7.5.22.1**

अग्नये-ऽँहोमुचे-ऽष्टाकपाल इन्द्रायाऽँहोमुच एकादशकपालो

मित्रावरुणाभ्या-मागोमुग्भ्यां पयस्या वायोसावित्र आगोमुग्भ्यां

चरुरश्विभ्या-मागोमुग्भ्यां धाना मरुद्भ्य एनोमुग्भ्यः सप्तकपालो

विश्वेभ्यो देवेभ्य एनोमुग्भ्यो द्वादशकपालो ऽनुमत्यै चरुरग्नये

वैश्वानराय द्वादशकपालो द्यावापृथिवीभ्या-मँहोमुग्भ्यां

द्विकपालः । 49 *(अग्नयेऽँहोमुचे - त्रिँशत्) (A22)*

7.5.23.1

अग्नये समनमत् पृथिव्यै समनमद्यथाऽग्निः पृथिव्या समनमदेवं मह्यं भद्राः संनतयः सं नमन्तु वायवे समनमदन्तरिक्षाय समनमद्यथा वायुरन्तरिक्षेण सूर्याय समनमद्दिवे समनमद्यथा सूर्यो दिवा चन्द्रमसे समनमन्नक्षत्रेभ्यः समनमद्यथा चन्द्रमा नक्षत्रैर्वरुणाय समनमदद्भ्यः समनमद्यथा – [ ] 50

7.5.23.2

वरुणोऽद्भिः साम्ने समनमदृचे समनमद्यथा सामर्चा ब्रह्मणे समनमत् क्षत्राय समनमद्यथा ब्रह्म क्षत्रेण राज्ञे समनमद्-विशे समनमद्यथा राजा विशा रथायः समनमदश्वेभ्यः समनमद्यथा रथोऽश्वैः प्रजापतये समनमद्-भूतेभ्यः समनमद्यथा प्रजापतिर्भूतैः समनमदेवं मह्यं ( ) भद्राः संनतयः सं नमन्तु । 51

*(अद्भ्यः समनमद्यथा – मह्यं – चत्वारि च) (A23)*

7.5.24.1

ये ते पन्थानः सवितः पूर्व्यासोऽरेणवो वितता अन्तरिक्षे ।

तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च देव ब्रूहि ।

नमोऽग्नये पृथिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि
नमो वायवेऽन्तरिक्षक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि
नमः सूर्याय दिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि । 52
*(यो ते - चतुश्चत्वारिꣳशत्) (A24)*

**7.5.25.1**

यो वा अश्वस्य मेध्यस्य शिरो वेद शीर्.षण्वान् मेध्यो भवत्युषा वा
अश्वस्य मेध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणश्चन्द्रमाः श्रोत्रं
दिशः पादा अवान्तरदिशाः पर्शवोऽहोरात्रे निमेषोऽर्धमासाः
पर्वाणि मासाः संधानान्यृतवोऽङ्गानि सँवथ्सर आत्मा
रश्मयः केषा नक्षत्राणि रूपं तारका अस्थानि नभो माꣳसान्योषधयो
लोमानि वनस्पतयो वाला अग्निर्मुखं वैश्वानरो व्यात्तꣳ - [ ] 53

**7.5.25.2**

समुद्र उदरमन्तरिक्षं पायु-र्द्यावापृथिवी आण्डौ ग्रावा शेपः
सोमो रेतो यज्जञ्जभ्यते तद्वि द्योतते यद्विधूनुते तथ् स्तनयति
यन्मेहति तद्वर्.षति वागेवास्य वागहर्वा अश्वस्य जायमानस्य महिमा

पुरस्ताज्जायते रात्रिरेनं महिमा पश्चादनु जायत एतौ वै महिमानावश्वमभितः सं बभूवतुर्.हयो देवानवह ( ) दर्वाऽसुरान् वाजी गन्धर्वानश्वो मनुष्यान्थ् समुद्रो वा अश्वस्य योनिः समुद्रो बन्धुः । **54** *(व्यात्त – मवहद् – द्वादश च ) (A25)*

**Prasna Korvai with starting Padams of 1 to 25 Anuvaakams :-**

(गावो – गावः सिषासन्तीः – प्रथमे मासि – समान्यो – यदि सोमौ – षडहै – रुथ् सृज्या(3)न् – देवाना – मर्क्येण – चर्माऽव – पृथिव्यै – दत्वते – कस्त्वा – ऽग्नये – यो वै – यः प्राणतो – य आत्मदा – आ ब्रह्म – न्नाऽक्रान् – जज्ञि बीज – माग्नेयोऽष्टाकपालो – ऽग्नयेऽ॒होमुचेऽष्टाकपालो – ऽग्नये समनमद् – ये ते पन्थानो – यो वा अश्वस्य मेध्यस्य शिरः – पञ्चवि॒शतिः)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(गावः – समान्यः – सवनमष्टाभि – र्वा एते देवकृतञ्चा –
ऽभिजित्या इत्याहु – र्वरुणोऽद्भिः साम्ने – चतुष् पञ्चासत्)

**First and Last Padam of fifth Prasnam of 7th Kandam :-**

(गावः – समुद्रो बन्धुः )

**Kaanda Korvai with starting Padams of all 5 Prasanams of Kandam 7**

प्रजननं – साद्याः – प्रजवं – बृहस्पति – र्गावः – पञ्च

**Samhita Korvai with starting Padams of all Seven Kandams**

इषे – वायव्यं – प्रजापति – र्युञ्जानाः – सावित्राणि –
प्राचीनवंशो – प्रजननं – सप्त

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां सप्तमकाण्डे पञ्चमः प्रश्नः समाप्तः ॥

॥ इति सप्तमं काण्डं ॥

# ॥ इति तैत्तिरीयसंहिता समाप्ता ॥

## Details of Anuvakam, Panchati and Padam for Kandam 7

| | Anuvakam | Panchati | Padams |
|---|---|---|---|
| Prasna 1 | 20 | 52 | 2635 |
| Prasna 2 | 20 | 50 | 2330 |
| Prasna 3 | 20 | 42 | 2123 |
| Prasna 4 | 22 | 53 | 2621 |
| Prasna 5 | 25 | 54 | 2631 |
| Total | 107 | 251 | 12340 |